New E[illegible] February 1[illegible]

[illegible]
[illegible] Senate House, Calcutta

[illegible] February, 19[illegible]

सूचीपत्रम्



प्रवेशिका

रामायणम्

वाल्मीकिः कवित्वलाभः[1]

[अस्मिन् लोके साम्प्रतं सर्वगुणाकरः कोऽस्तीति पृष्टवते वाल्मीकये नारदः संक्षेपतो रामचरितमुपदिश्य देवलोकं जगाम ।]

स मुहूर्तं गते तस्मिन् देवलोकं मुनिस्तदा ।
जगाम तमसातीरं जाह्नव्यास्त्वविदूरतः ॥१॥
स तु तीरं समासाद्य तमसाया मुनिस्तदा ।
शिष्यमाह स्थितं पार्श्वे दृष्ट्वा तीर्थमकर्दमम् ॥२॥
"अकर्दममिदं तीर्थं भरद्वाज ! निशामय ।
रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा ॥३॥
न्यस्यतां कलशस्तात ! दीयतां वल्कलं मम ।
इदमेवावगाहिष्ये तमसातीर्थमुत्तमम्" ॥४॥

---

[1] कवित्वलाभः—[illegible] (Kavi[illegible])

एवमुक्तो भरद्वाजो वाल्मीकेन महात्मना ।
प्रायच्छत मुनेस्तस्य वल्कलं नियतो गुरोः ॥५॥
स शिष्यहस्तादादाय वल्कलं नियतेन्द्रियः ।
विचचार ह पश्यंस्तत् सर्वतो विपुलं वनम् ॥६॥
तस्याभ्याशे तु मिथुनं चरन्तमनपायिनम् ।
ददर्श भगवांस्तत्र क्रौञ्चयोश्चारुनिःस्वनम् ॥७॥
तस्मात्तु मिथुनादेकं पुमांसं पापनिश्चयः ।
जघान वैरनिलयो निषादस्तस्य पश्यतः ॥८॥
तं शोणितपरीताङ्गं वेष्टमानं महीतले ।
भार्या तु निहतं दृष्ट्वा रुराव करुणां गिरम् ॥९॥
तथाविधं द्विजं दृष्ट्वा निषादेन निपातितम् ।
ऋषेर्धर्मात्मनस्तस्य कारुण्यं समपद्यत ॥१०॥
ततः करुणवेदित्वादधर्मोऽयमिति द्विजः ।
निशाम्य रुदतीं क्रौञ्चीमिदं वचनमब्रवीत् ॥११॥
"मा निषाद! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्" ॥१२॥
तस्यैवं ब्रुवतश्चिन्ता बभूव हृदि वीक्षतः ।
शोकार्तेनास्य शकुनेः किमिदं व्याहृतं मया ? ॥१३॥
चिन्तयन् स महाप्राज्ञश्चकार मतिमान् मतिम् ।
शिष्यं चैवाब्रवीद् वाक्यमिदं स मुनिपुङ्गवः ॥१४॥
"पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः ।
शोकार्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा" ॥१५॥

शिष्यस्तु तस्य ब्रुवतो मुनेर्वाक्यमनुत्तमम् ।
प्रतिजग्राह सन्तुष्टस्तस्य तुष्टोऽभवन्मुनिः ॥१६॥
सोऽभिषेकं ततः कृत्वा तीर्थे तस्मिन् यथाविधि ।
तमेव चिन्तयन्नर्थमुपावर्तत वै मुनिः ॥१७॥
भरद्वाजस्ततः शिष्यो विनीतः श्रुतवान् गुरोः ।
कलशं पूर्णमादाय पृष्ठतोऽनुजगाम ह ॥१८॥
स प्रविश्याश्रमपदं शिष्येण सह धर्मवित् ।
उपविष्टः कथाश्चान्याश्चकार ध्यानमास्थितः ॥१९॥

आजगाम ततो ब्रह्मा लोककर्त्ता स्वयं प्रभुः ।
चतुर्मुखो महातेजा द्रष्टुं तं मुनिपुङ्गवम् ॥२०॥
वाल्मीकिरथ तं दृष्ट्वा सहसोत्थाय वाग्यतः ।
पूजयामास तं देवं पाद्यार्घ्यासनवन्दनैः ॥२१॥
अथोपविश्य भगवानासने परमार्चिते ।
वाल्मीकये च ऋषये सन्दिदेशासनं ततः ॥२२॥
ब्रह्मणा समनुज्ञातः सोऽप्युपाविशदासने ।
तद्गतेनैव मनसा वाल्मीकिर्ध्यानमास्थितः ॥२३॥
पापात्मना कृतं कष्टं वैरग्रहणबुद्धिना ।
यस्तादृशं चारुरवं क्रौञ्चं हन्यादकारणात् ॥२४॥
शोचन्नेव पुनः क्रौञ्चीमुप श्लोकमिमं जगौ ।
तमुवाच ततो ब्रह्मा प्रहसन् मुनिपुङ्गवम् ॥२५॥
"श्लोक एवास्त्वयं बद्धो नात्र कार्या विचारणा ।
मच्छन्दादेव ते ब्रह्मन् ! प्रवृत्तेयं सरस्वती ॥२६॥

बह्वीनामुत्तमस्त्रीणामाहृतानामितस्ततः ।
सर्वासामेव, भद्रं ते, ममाग्रमहिषी भव ॥४८॥
लङ्का नाम समुद्रस्य मध्ये मम महापुरी ।
सागरेण परिक्षिप्ता निविष्टा गिरिमूर्द्धनि ॥४८॥
तत्र सीते ! मया सार्द्धं वनेषु विचरिष्यसि ।
न चास्य वनवासस्य स्पृहयिष्यसि भामिनि ! ॥५०॥
पञ्च दास्यः सहस्राणि सर्वाभरणभूषिताः ।
सीते ! परिचरिष्यन्ति भार्या भवसि मे यदि" ॥५१॥

रावणेनैवमुक्ता तु कुपिता जनकात्मजा ।
प्रत्युवाचानवद्याङ्गी तमनादृत्य राक्षसम् ॥५२॥
"महागिरिमिवाकम्प्यं महेन्द्रसदृशं पतिम् ।
महोदधिमिवाक्षोभ्यमहं राममनुव्रता ॥५३॥
सर्वलक्षणसम्पन्नं न्यग्रोधपरिमण्डलम् ।
सत्यसन्धं महाभागमहं राममनुव्रता ॥५४॥
महाबाहुं महोरस्कं सिंहविक्रान्तगामिनम् ।
नृसिंहं सिंहसङ्काशमहं राममनुव्रता ॥५५॥
पूर्णचन्द्राननं रामं राजवत्सं जितेन्द्रियम् ।
पृथुकीर्त्तिं महाबाहुमहं राममनुव्रता ॥५६॥
त्वं पुनर्जम्बुकः सिंहीं मामिहेच्छसि दुर्लभाम् ।
नाहं शक्या त्वया स्प्रष्टुमादित्यस्य प्रभा यथा ॥५७॥
पादपान् काञ्चनान् नूनं बहून् पश्यसि मन्दभाक् ।
राघवस्य प्रियां भार्यां यस्त्वमिच्छसि राक्षस ! ॥५८॥

त्वया तु खलु वस्तव्यं नव वर्षाणि पञ्च च ।
वने," प्रव्रज काकुत्स्थ ! पितरं मोचयानृतात् ' ॥३७॥
'तथे'त्युवाच तां रामः कैकेयीमकुतोभयः ।
चकार तद्वचः श्रुत्वा भर्ता मम दृढव्रतः ॥३८॥
दद्यान्न प्रतिगृह्णीयात्, सत्यं ब्रूयान्न चानृतम् ।
एतद् ब्राह्मण ! रामस्य व्रतं ध्रुवमनुत्तमम् ॥३९॥
तस्य भ्राता तु वैमात्रो लक्ष्मणो नाम वीर्यवान् ।
रामस्य पुरुषव्याघ्रः सहायः समरेऽरिहा ॥४०॥
स भ्राता लक्ष्मणो नाम ब्रह्मचारी दृढव्रतः ।
अन्वगच्छद्धनुष्पाणिः प्रव्रजन्तं मया सह ॥४१॥
ते वयं प्रच्युता राज्यात् कैकेय्यास्तु कृते त्रयः ।
विचरामो द्विजश्रेष्ठ ! वनं गम्भीरमोजसा ॥४२॥
समाश्वस मुहूर्तं तु शक्यं वस्तुमिह त्वया ।
आगमिष्यति मे भर्ता वन्यमादाय पुष्कलम् ॥४३॥
स त्वं नाम च, गोत्रं च, कुलमाचक्ष्व तत्त्वतः ।
एकश्च दण्डकारण्ये किमर्थं चरसि द्विज ! " ॥४४॥
एवं ब्रुवन्त्यां सीतायां रामपत्न्यां महाबलः ।
प्रत्युवाचोत्तरं तीव्रं रावणो राक्षसाधिपः ॥४५॥
" येन वित्रासिता लोकाः सदेवासुरमानुषाः ।
अहं स रावणो नाम सीते ! रक्षोगणेश्वरः ॥४६॥
त्वां तु काञ्चनवर्णाभां दृष्ट्वा कौशेयवासिनीम् ।
रतिं स्वकेषु दारेषु नाधिगच्छाम्यनिन्दिते ! ॥४७॥

बह्वीनामुत्तमस्त्रीणामाहृतानामितस्ततः ।
सर्वासामेव, भद्रं ते, ममाग्रमहिषी भव ॥४८॥
लङ्का नाम समुद्रस्य मध्ये मम महापुरी ।
सागरेण परिक्षिप्ता निविष्टा गिरिमूर्द्धनि ॥४९॥
तत्र सीते ! मया सार्द्धं वनेषु विचरिष्यसि ।
न चास्य वनवासस्य स्पृहयिष्यसि भामिनि ! ॥५०॥
पञ्च दास्यः सहस्राणि सर्वाभरणभूषिताः ।
सीते ! परिचरिष्यन्ति भार्या भवसि मे यदि" ॥५१॥

रावणेनैवमुक्ता तु कुपिता जनकात्मजा ।
प्रत्युवाचानवद्याङ्गी तमनादृत्य राक्षसम् ॥५२॥
" महागिरिमिवाकम्प्यं महेन्द्रसदृशं पतिम् ।
महोदधिमिवाक्षोभ्यमहं राममनुव्रता ॥५३॥
सर्वलक्षणसम्पन्नं न्यग्रोधपरिमण्डलम् ।
सत्यसन्धं महाभागमहं राममनुव्रता ॥५४॥
महाबाहुं महोरस्कं सिंहविक्रान्तगामिनम् ।
नृसिंहं सिंहसङ्काशमहं राममनुव्रता ॥५५॥
पूर्णचन्द्राननं रामं राजवत्सं जितेन्द्रियम् ।
पृथुकीर्त्तिं महाबाहुमहं राममनुव्रता ॥५६॥
त्वं पुनर्जम्बुकः सिंहीं मामिहेच्छसि दुर्लभाम् ।
नाहं शक्या त्वया स्प्रष्टुमादित्यस्य प्रभा यथा ॥५७॥
पादपान् काञ्चनान् नूनं बहून् पश्यसि मन्दभाक् ।
राघवस्य प्रियां भार्यां यस्त्वमिच्छसि राक्षस ! ॥५८॥

[illegible]

[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]

अहंकारं [illegible]
अहंकारं [illegible]
[illegible]
अहंकारं [illegible] ॥

अहंकारं [illegible]
अहंकारं [illegible] ।
अहंकारं [illegible]
अहंकारं [illegible] ॥

यदन्तरं वायस-वैनतेययो-
र्यदन्तरं मद्गु-मयूरयोरपि।
यदन्तरं हंसक-गृध्रयोर्वने
तदन्तरं दाशरथेस्तवैव च ॥२७॥

तस्मिन् सहस्राक्षसमप्रभावे
रामे स्थिते कार्मुकबाणपाणौ।
हृतापि तेऽहं न जरां गमिष्ये
आज्यं यथा मक्षिकयावगीर्णम्" ॥२८॥

इतीव तद्वाक्यमदुष्टभावा
सुदुष्टमुक्त्वा रजनीचरं तम्।
गात्रप्रकम्पाद् व्यथिता बभूव
वातोद्धता सा कदलीव तन्वी ॥२९॥

एवं ब्रुवत्यां सीतायां संरब्धः परुषं वचः।
ललाटे भ्रुकुटिं कृत्वा रावणः प्रत्युवाच ह ॥३०॥

"भ्राता वैश्रवणस्याहं सापत्नो वरवर्णिनि।
रावणो नाम, भद्रं ते, दशग्रीवः प्रतापवान् ॥३१॥

यस्य देवाः सगन्धर्वाः, पिशाचाः, पतगोरगाः।
विद्रवन्ति सदा भीता मृत्योरिव सदा प्रजाः ॥३२॥

येन वैश्रवणो भ्राता वैमात्रः कारणान्तरे।
द्वन्द्वमासादितः क्रोधाद्रणे विक्रम्य निर्जितः ॥३३॥

मद्भयार्तः परित्यज्य स्वमधिष्ठानमृद्धिमत्।
कैलासं पर्वतश्रेष्ठमध्यास्ते नरवाहनः ॥३४॥

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

यदक्षरं [illegible]
यदक्षरं [illegible] ।
[illegible]
यदक्षरं [illegible] ॥ [illegible] ॥

यदक्षरं [illegible]
यदक्षरं [illegible] ।
यदक्षरं [illegible]
तदक्षरं [illegible] ॥ [illegible] ॥

यदन्तरं वायस-वैनतेययो-
र्यदन्तरं मद्गु-मयूरयोरपि।
यदन्तरं हंसक-गृध्रयोर्वने
तदन्तरं दाशरथेस्तवैव च ॥२७॥
तस्मिन् सहस्राक्षसमप्रभावे
रामे स्थिते कार्मुकबाणपाणौ।
हृतापि तेऽहं न जरां गमिष्ये
आज्यं यथा मक्षिकयावकीर्णम्" ॥२८॥
इतीव तद्वाक्यमदुष्टभावा
सुदुष्टमुक्त्वा रजनीचरं तम्।
गात्रप्रकम्पाद् व्यथिता बभूव
वातोद्धता सा कदलीव तन्वी ॥२९॥
एवं ब्रुवत्यां सीतायां संरब्धः परुषं वचः।
ललाटे भ्रुकुटिं कृत्वा रावणः प्रत्युवाच ह ॥३०॥
"भ्राता वैश्रवणस्याहं सापत्नो वरवर्णिनि!
रावणो नाम, भद्रं ते, दशग्रीवः प्रतापवान् ॥३१॥
यस्य देवाः सगन्धर्वाः, पिशाचाः, पतगोरगाः।
विद्रवन्ति सदा भीता मृत्योरिव सदा प्रजाः ॥३२॥
येन वैश्रवणो भ्राता वैमात्रः कारणान्तरे।
द्वन्द्वमासादितः क्रोधाद्रणे विक्रम्य निर्जितः ॥३३॥
मद्भयार्तः परित्यज्य स्वमधिष्ठानमृद्धिमत्।
कैलासं पर्वतश्रेष्ठमध्यास्ते नरवाहनः ॥३४॥

क्षुधितस्य च सिंहस्य मृगशत्रोस्तरस्विनः ।
आशीविषस्य वदनात् दंष्ट्रामादातुमिच्छसि ॥१२

मन्दरं पर्वतश्रेष्ठं पाणिना हर्तुमिच्छसि ।
कालकूटविषं पीत्वा स्वस्तिमान् गन्तुमिच्छसि ॥१

अक्षि सूच्या प्रमृजसि, जिह्वया लेढि च क्षुरम् ।
राघवस्य प्रियां भार्यामधिगन्तुं त्वमिच्छसि ॥११

अवसज्य शिलां कण्ठे समुद्रं तर्तुमिच्छसि ।
सूर्याचन्द्रमसौ चोभौ पाणिभ्यां हर्तुमिच्छसि ॥१

यो रामस्य प्रियां भार्यां प्रधर्षयितुमिच्छसि ।
अग्निं प्रज्वलितं दृष्ट्वा वस्त्रेणाहर्तुमिच्छसि ॥१३

कल्याणवृत्तां यो भार्यां रामस्याहर्तुमिच्छसि ।
अयोमुखानां शूलानां मध्ये चरितुमिच्छसि ॥१४

यदन्तरं सिंहसृगालयोर्वने
यदन्तरं स्यन्दनिका समुद्रयोः ।
सुराग्र्य-सौवीरकयोर्यदन्तरं
तदन्तरं दाशरथेस्तवैव च ॥६५॥

यदन्तरं काञ्चन-सीसलोहयो-
र्यदन्तरं चन्दनवारि पङ्कयोः ।
यदन्तरं हस्ति-बिडालयोर्वने
तदन्तरं दाशरथेस्तवैव च ॥६६॥

यदन्तरं वायस-वैनतेययो-
र्यदन्तरं मद्गु-मयूरयोरपि ।
यदन्तरं हंसक-गृध्रयोर्वने
तदन्तरं दाशरथेस्तवैव च ॥६७॥
तस्मिन् सहस्राक्षसमप्रभावे
रामे स्थिते कार्मुकबाणपाणौ ।
हृतापि तेऽहं न जरां गमिष्ये
वाज्यं यथा मक्षिकयावकीर्णम् " ॥६८॥
इतीव तद्वाक्यमदुष्टभावा
सुदुष्टमुक्ता रजनीचरं तम् ।
गात्रप्रकम्पाद् व्यथिता बभूव
वातोद्धता सा कदलीव तन्वी ॥६९॥
एवं ब्रुवत्यां सीतायां संरब्धः परुषं वचः ।
ललाटे भ्रुकुटिं कृत्वा रावणः प्रत्युवाच ह ॥७०॥
"भ्राता वैश्रवणस्याहं सापत्नो वरवर्णिनि !
रावणो नाम, भद्रं ते, दशग्रीवः प्रतापवान् ॥७१॥
यस्य देवाः सगन्धर्वाः, पिशाचाः, पतगोरगाः ।
विद्रवन्ति सदा भीता मृत्योरिव सदा प्रजाः ॥७२॥
येन वैश्रवणो भ्राता वैमात्रः कारणान्तरे ।
द्वन्द्वमासादितः क्रोधाद्रणे विक्रम्य निर्जितः ॥७३॥
मद्भयार्तः परित्यज्य स्वमधिष्ठानमृद्धिमत् ।
कैलासं पर्वतश्रेष्ठमध्यास्ते नरवाहनः ॥७४॥

यस्य तत् पुष्पकं नाम विमानं कामगं शुभम् ।
वीर्य्यादावर्जितं भद्रे ! येन यामि विहायसम् ॥७५॥
मम सञ्जातरोषस्य मुखं दृष्ट्वैव मैथिलि ।
विद्रवन्ति परित्रस्ताः सुराः शक्रपुरोगमाः ॥७६॥
यत्र तिष्ठाम्यहं तत्र मारुतो वाति शङ्कितः ।
तीव्रांशुः शिशिरांशुश्च भयात् सम्पद्यते दिवि ॥७७॥
निष्कम्पपत्रास्तरवो, नद्यश्च स्तिमितोदकाः ।
भवन्ति तत्र यत्राहं तिष्ठामि च चरामि च ॥७८॥
मम पारे समुद्रस्य लङ्का नाम पुरी शुभा ।
सम्पूर्णा राक्षसैर्घोरैर्यथेन्द्रस्यामरावती ॥७९॥
प्राकारेण परिक्षिप्ता पाण्डुरेण विराजिता ।
हेमकक्ष्या पुरी रम्या वैदूर्य्यमयतोरणा ॥८०॥
हस्त्यश्वरथसम्बाधा तूर्य्यनादविनादिता ।
सर्व्वकामफलैर्वृक्षैः सङ्कुलोद्यानभूषिता ॥८१॥
तत्र त्वं वस हे सीते ! राजपुत्रि ! मया सह ।
न स्मरिष्यसि नारीणां मानुषीणां मनस्विनि ! ॥८२॥
भुञ्जाना मानुषान् भोगान् दिव्यांश्च वरवर्णिनि !
न स्मरिष्यसि रामस्य मानुषस्य गतायुषः ॥८३॥
स्थापयित्वा प्रियं पुत्रं राज्ये दशरथो नृपः ।
मन्दवीर्य्यस्ततो ज्येष्ठः सुतः प्रस्थापितो वनम् ॥८४॥
तेन किं भ्रष्टराज्येन रामेण गतचेतसा ।
करिष्यसि विशालाक्षि ! तापसेन तपस्विना ॥८५॥

रक्ष राक्षसभर्तारं कामय स्वयमागतम् ।
न मन्मथशराविष्टं प्रत्याख्यातुं त्वमर्हसि ॥८६॥
प्रत्याख्याय हि मां भीरु ! पश्चात्तापं गमिष्यसि ।
चरणेनाभिहत्येव पुरूरवसमुर्वशी ॥८७॥
अङ्गुल्या न समो रामो मम युद्धे स मानुषः ।
तव भाग्येन सम्प्राप्तं भज मां वरवर्णिनि !" ॥८८॥

एवमुक्ता तु वैदेही क्रुद्धा संरक्तलोचना ।
अब्रवीत् परुषं वाक्यं रहिते राक्षसाधिपम् ॥८९॥
"कथं वैश्रवणं देवं सर्वदेवनमस्कृतम् ।
भ्रातरं व्यपदिश्य त्वमशुभं कर्तुमिच्छसि ? ॥९०॥
अवश्यं विनशिष्यन्ति सर्वे रावण ! राक्षसाः ।
येषां त्वं कर्कशो राजा दुर्बुद्धिरजितेन्द्रियः ॥९१॥
अपहृत्य शचीं भार्यां शक्यमिन्द्रस्य जीवितुम् ।
न हि रामस्य भार्यां मामानीय स्वस्तिमान् भवेत् ॥९२॥

जीवेच्चिरं वज्रधरस्य हस्ता-
च्छचीं प्रधृष्याप्रतिरूपरूपाम् ।
न मादृशीं राक्षस ! धर्षयित्वा
पीतामृतस्यापि तवास्ति मोक्षः" ॥९३॥

सीताया वचनं श्रुत्वा दशग्रीवः प्रतापवान् ।
हस्ते हस्तं समाहत्य चकार सुमहद्वपुः ॥९४॥
स मैथिलीं पुनर्वाक्यं बभाषे वाक्यकोविदः ।
"नोन्मत्तया श्रुतौ मन्ये मम वीर्य-पराक्रमौ ॥९५॥

[illegible] ।
[illegible] ॥९६॥
[illegible] ।
[illegible] ॥९७॥

[illegible] त्रिदण्डी ।
[illegible] ॥९८॥
[illegible] रावणः ।
[illegible] ॥९९॥
[illegible] ।
[illegible] ।
[illegible] ॥१००॥
अभिगम्य सुदुष्टात्मा राक्षसः काममोहितः ।
अथाह रावणः सीतां [illegible] ॥१०१॥

तं दृष्ट्वा गिरिशृङ्गाभं [illegible] महाभुजम् ।
प्राद्रवन् मृत्युसङ्काशं भयार्ता वनदेवताः ॥१०२॥
स तु मायामयो दिव्यः खरयुक्तः खरस्वनः ।
प्रत्यदृश्यत हेमाङ्गो रावणस्य महारथः ॥१०३॥
ततस्तां परुषैर्वाक्यैरभितर्ज्य महास्वनः ।
अङ्केनादाय वैदेहीं रथमारोपयत् तदा ॥१०४॥
सा गृहीतातिदुःखार्ता रावणेन यशस्विनी ।
रामेति सीता दुःखार्ता रामं दूरगतं वने ॥१०५॥

तामकामां स कामार्तः पन्नगेन्द्रवधूमिव ।
विचेष्टमानामादाय उत्पपाताथ रावणः ॥१०६॥
ततः सा राक्षसेन्द्रेण ह्रियमाणा विहायसा ।
भृशं चुक्रोश मत्तेव भ्रान्तचित्ता यथातुरा ॥१०७॥
"हा लक्ष्मण ! महाबाहो ! गुरुचित्तप्रसादक !
ह्रियमाणां न जानीषे रक्षसा कामरूपिणा ॥१०८॥
जीवितं सुखमर्थं च धर्महेतोः परित्यजन् ।
ह्रियमाणामधर्मेण मां राघव ! न पश्यसि ? ॥१०९॥
ननु नामाविनीतानां विनेतासि परन्तप !
कथमेवंविधं पापं न त्वं शाधि हि रावणम् ? ॥११०॥
न तु सद्योऽविनीतस्य दृश्यते कर्मणः फलम् ।
कालोऽप्यङ्गीभवत्यत्र सस्यानामिव पक्तये ॥१११॥
त्वं कर्म कृतवानेतत् कालोपहतचेतनः ।
जीवितान्तकरं घोरं रामाद् व्यसनमाप्नुहि ॥११२॥
आमन्त्रये जनस्थाने कर्णिकारांश्च पुष्पितान् ।
क्षिप्रं रामाय शंसध्वं 'सीतां हरति रावणः' ॥११३॥
हंस-सारस-संघुष्टां वन्दे गोदावरीं नदीम् ।
क्षिप्रं रामाय शंसध्वं 'सीतां हरति रावणः' ॥११४॥
दैवतानि च यान्त्यस्मिन् वने विविधपादपे ।
नमस्करोम्यहं तेभ्यो भर्तुः शंसत मां हृताम् ॥११५॥
यानि कानिचिदप्यत्र सत्त्वानि विविधानि च ।
सर्वाणि शरणं यामि मृगपक्षिगणानि वै ॥११६॥

ह्रियमाणां प्रियां भर्तुः प्राणेभ्योऽपि गरीयसीम् ।
'विवशा ते हृता सीता रावणेने'ति शंसत ॥११७॥
विदित्वा तु महाबाहुरमुत्रापि महाबलः ।
आनेष्यति पराक्रम्य वैवस्वतहृतामपि" ॥११८॥

सा तदा करुणा वाचो विलपन्ती सुदुःखिता ।
वनस्पतिगतं गृध्रं ददर्शायतलोचना ॥११९॥
सा तमुद्वीक्ष्य सुश्रोणी रावणस्य वशं गता ।
समाक्रन्दद् भयपरा दुःखोपहतया गिरा ॥१२०॥
"जटायो ! पश्य मामार्य ! ह्रियमाणामनाथवत् ।
अनेन राक्षसेन्द्रेणाकरुणं पापकर्मणा ॥१२१॥
नैष वारयितुं शक्यस्त्वया क्रूरो निशाचरः ।
रामाय तु यथातत्त्वं जटायो ! हरणं मम ।
लक्ष्मणाय च तत् सर्वमाख्यातव्यमशेषतः" ॥१२२॥

तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे ।
निरैक्षद्रावणं क्षिप्रं वैदेहीं च ददर्श सः ॥१२३॥
ततः पर्वतकूटाभस्तीक्ष्णतुण्डः खगोत्तमः ।
वनस्पतिगतः श्रीमान् व्याजहार शुभां गिरम् ॥१२४॥
"दशग्रीव ! स्थितो धर्मे पुराणे सत्यसंश्रयः ।
भ्रातस्त्वं निन्दितं कर्म कर्तुं नार्हसि साम्प्रतम् ।
जटायुर्नाम नाम्नाहं गृध्रराजो महाबलः ॥१२५॥
राजा सर्वस्य लोकस्य महेन्द्रवरुणोपमः ।
लोकानां च हिते युक्तो रामो दशरथात्मजः ॥१२६॥

तस्यैषा लोकनाथस्य धर्मपत्नी यशस्विनी ।
सीता नाम वरारोहा यां त्वं हर्तुमिहेच्छसि ।
कथं राजा स्थितो धर्मे परदारान् परामृशेत् ? ॥१२७॥

रक्षणीया विशेषेण राजदारा महाबल !
निवर्तय गतिं नीचां परदाराभिमर्शनात् ॥१२८॥

न तत् समाचरेद्धीरो यत् परोऽस्य विगर्हयेत् ।
यथात्मनस्तथान्येषां दारा रक्ष्या विमर्शनात् ॥१२९॥

पापस्वभावश्चपलः कथं त्वं रक्षसां वर !
ऐश्वर्यमभिसम्प्राप्तो विमानमिव दुष्कृतिः ॥१३०॥

विषये वा पुरे वा ते यदा रामो महाबलः ।
नापराध्यति धर्मात्मा कथं तस्यापराध्यसि ? ॥१३१॥

क्षिप्रं विसृज वैदेहीं मा त्वा घोरेण चक्षुषा ।
दहेद्दहनभूतेन वृत्रमिन्द्राशनिर्यथा ॥१३२॥
सर्पमाशीविषं बद्ध्वा वस्त्रान्ते नावबुध्यसे ?
ग्रीवायां प्रतिमुक्तं च कालपाशं न पश्यसि ? ॥१३३॥
स भारः सौम्य ! भर्तव्यो यो नरं नावसादयेत् ।
तदन्नमपि भोक्तव्यं जीर्यते यदनामयम् ॥१३४॥
यत् कृत्वा न भवेद्धर्मो, न कीर्तिर्न यशो ध्रुवम् ।
शरीरस्य भवेत् खेदः, कस्तत् कर्म समाचरेत् ? ॥१३५॥
षष्टिवर्षसहस्राणि जातस्य मम रावण !
पितृपैतामहं राज्यं यथावदनुतिष्ठतः ॥१३६॥

वृद्धोऽहं, त्वं युवा, धन्वी, सरथः, कवची, शरी ।
न चाप्यादाय कुशली वैदेहीं मे गमिष्यसि ॥१३७॥
न शक्तस्त्वं बलाद्धर्तुं वैदेहीं मम पश्यतः ।
हेतुभिर्न्यायसंयुक्तैर्ध्रुवां वेदश्रुतीमिव ॥१३८॥
युध्यस्व यदि शूरोऽसि मुहूर्तं तिष्ठ रावण !
शयिष्यसे हतो भूमौ यथा पूर्वं खरस्तथा ॥१३९॥
असकृत् संयुगे येन निहता दैत्यदानवाः ।
नचिराच्चीरवासास्त्वां रामो युधि वधिष्यति ॥१४०॥
किन्तु शक्यं मया कर्तुं गतौ दूरं नृपात्मजौ ।
क्षिप्रं त्वं नश्यसे नीच ! तयोर्भीतो न संशयः ॥१४१॥
न हि मे जीवमानस्य नयिष्यसि शुभामिमाम् ।
सीतां कमलपत्राक्षीं रामस्य महिषीं प्रियाम् ॥१४२॥
अवश्यं तु मया कार्यं प्रियं तस्य महात्मनः ।
जीवितेनापि रामस्य तथा दशरथस्य च ॥१४३॥
तिष्ठ तिष्ठ दशग्रीव ! मुहूर्तं पश्य रावण !
वृन्तादिव फलं त्वां तु पातयेयं रथोत्तमात्" ॥१४४॥
ततः क्रोध-ताम्राक्षस्तप्त-काञ्चन-कुण्डलः ।
राक्षसेन्द्रोऽभिदुद्राव पतगेन्द्रममर्षणः ॥१४५॥
स सम्प्रहारस्तुमुलस्तयोस्तस्मिन् महामृधे ।
बभूव वातोद्धतयोर्मेघयोर्गगने यथा ॥१४६॥
तद् बभूवाद्भुतं युद्धं गृध्र-राक्षसयोस्तदा ।
सपक्षयोर्माल्यवतोर्महापर्वतयोरिव ॥१४७॥

ततो नालीक-नाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः ।
अभ्यवर्षन् महाघोरैर्गृध्रराजं महाबलम् ॥१४८॥
स तानि शरजालानि गृध्रः पत्ररथेश्वरः ।
जटायुः प्रतिजग्राह रावणास्त्राणि संयुगे ॥१४९॥
तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः ।
चकार बहुधा गात्रे व्रणान् पतगसत्तमः ॥१५०॥
अथ क्रोधाद्दशग्रीवो जग्राह दश मार्गणान् ।
मृत्युदण्डनिभान् घोरान् शत्रोर्निधनकाङ्क्षया ॥१५१॥
स तैर्बाणैर्महावीर्यः पूर्णमुक्तैरजिह्मगैः ।
बिभेद निशितैस्तीक्ष्णैर्गृध्रं घोरैः शिलीमुखैः ॥१५२॥
स राक्षसरथे पश्यञ्जानकीं बाष्पलोचनाम् ।
अचिन्तयित्वा बाणांस्तान् राक्षसं समभिद्रवत् ॥१५३॥
स तानि शरजालानि पक्षाभ्यां तु विधूय च ।
चरणाभ्यां महातेजा बभञ्जास्य महद्धनुः ॥१५४॥
तथाग्निसदृशं दीप्तं रावणस्य शरावरम् ।
पक्षाभ्यां च महातेजा व्यधुनोत्पतगेश्वरः ॥१५५॥
काञ्चनोरश्छदान् दिव्यान् पिशाचवदनान् खरान् ।
तांश्चास्य जवसम्पन्नाञ्जघान समरे बली ॥१५६॥
अथ त्रिवेणुसम्पन्नं कामगं पावकार्चिषम् ।
मणिसोपानचित्राङ्गं बभञ्ज च महारथम् ॥१५७॥
पूर्णचन्द्रप्रतीकाशं छत्रं च व्यजनैः सह ।
पातयामास वेगेन ग्राहिभी राक्षसैः सह ॥१५८॥

सारथिं चास्य वेगेन तुण्डेन च महाद्युतिः ।
पुनर्व्यपाहनत्क्रामान् पक्षिराजो महाबलः ॥१५९॥
स भग्नधन्वा विरथो हताश्वो हतसारथिः ।
अङ्केनादाय वैदेहीं पपात भुवि रावणः ॥१६०॥
दृष्ट्वा निपतितं भूमौ रावणं भग्नवाहनम् ।
साधु साध्विति भूतानि गृध्रराजमपूजयन् ॥१६१॥
परिश्रान्तं तु तं दृष्ट्वा जरया पक्षियूथपम् ।
उत्पपात पुनर्हृष्टो मैथिलीं गृह्य रावणः ॥१६२॥
तं प्रहृष्टं निधायाङ्के रावणं जनकात्मजाम् ।
गच्छन्तं खड्गशेषं च प्रनष्ट-हतसाधनम् ॥
गृध्रराजः समुत्पत्य रावणं समभिद्रवत् ।
समावार्य महातेजा जटायुरिदमब्रवीत् ॥१६३-१६४॥
"वज्रसंस्पर्शबाणस्य भार्यां रामस्य रावण !
अल्पबुद्धे ! हरस्येनां वधाय खलु रक्षसाम् ॥१६५॥
समित्रबन्धुः, सामात्यः, सबलः, सपरिच्छदः ।
विषपानं पिबस्येतत् पिपासित इवोदकम् ॥१६६॥
अनुबन्धमजानन्तः कर्मणामविचक्षणाः ।
शीघ्रमेव विनश्यन्ति, तथा त्वं विनशिष्यसि ॥१६७॥
बद्धस्त्वं कालपाशेन क्व गतस्तस्य मोक्ष्यसे ?
वधाय बडिशं गृह्य सामिषं जलजो यथा ॥१६८॥
न हि जातु दुराधर्षौ काकुत्स्थौ तव रावण !
धर्षणाश्रमस्यास्य क्षमिष्येते तु राघवौ ॥१६९॥

यथा त्वया कृतं कर्म भीरुणा लोकगर्हितम् ।
तस्कराचरितो मार्गो नैव वीरनिषेवितः ॥१३०॥
युध्यस्व यदि शूरोऽसि मुहूर्तं तिष्ठ रावण ।
शयिष्यसे हतो भूमौ यथा भ्राता खरस्तथा ॥१३१॥
परितकाले पुरुषो यत् कर्म प्रतिपद्यते ।
विनाशायात्मनोऽधर्म्यं प्रतिपन्नोऽसि कर्म तत्" ॥१३२॥
एवमुक्त्वा शुभं वाक्यं जटायुस्तस्य रक्षसः ।
निपपात भृशं पृष्ठे दशग्रीवस्य वीर्यवान् ॥१३३॥
तं गृहीत्वा नखैस्तीक्ष्णैर्विददार समन्ततः ।
केशांश्चोत्पाटयामास नखपक्षमुखायुधः ॥१३४॥
स तदा गृध्रराजेन क्लिश्यमानो मुहुर्मुहुः ।
अमर्षस्फुरितोष्ठः सन् प्राकम्पत च राक्षसः ॥१३५॥
सम्परिष्वज्य वैदेहीं वामेनाङ्केन रावणः ।
तलेनाभिजघानार्तो जटायुं क्रोधमूर्च्छितः ॥१३६॥
जटायुस्तमतिक्रम्य तुण्डेनास्य खगाधिपः ।
वामबाहून् दश तदा व्यपाहरदरिन्दमः ॥१३७॥
संछिन्नबाहोः सद्यो वै बाहवः सहसाभवन् ।
विषज्वालावलीयुक्ता वल्मीकादिव पन्नगाः ॥१३८॥
ततः क्रोधाद्दशग्रीवः सीतामुत्सृज्य वीर्यवान् ।
मुष्टिभ्यां चरणाभ्यां च गृध्रराजमपोथयत् ॥१३९॥
तस्य व्यायच्छमानस्य रामस्यार्थे स रावणः ।
पक्षौ पादौ च पार्श्वौ च खड्गमुद्धृत्य सोऽच्छिनत् ॥१४०॥

[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
प्रार्थितायां सीतायां [illegible] ।
जगत् सर्वमिदं [illegible] ॥ [illegible] ॥

चन्द्रोदयवर्णनम्[1]

चन्द्रोऽपि साचिव्यमिवास्य कुर्वं-
स्तारागणैर्मध्यगतो विराजन् ।
ज्योत्स्नावितानेन वितत्य लोका-
नुत्तिष्ठतेऽनेकसहस्ररश्मिः ॥१॥

शङ्खप्रभं क्षीरमृणालवर्ण-
मुद्गच्छमानं व्यवभासमानम् ।
ददर्श चन्द्रं स कपिप्रवीरः[2]
पोप्लूयमानं सरसीव हंसम् ॥२॥

ततः स मध्यं गतमंशुमन्तं
ज्योत्स्नावितानं मुहुरुद्वमन्तम् ।
ददर्श धीमान् भुवि भानुमन्तं
गोष्ठे वृषं मत्तमिव भ्रमन्तम् ॥३॥

लोकस्य पापानि विनाशयन्तं
महोदधिं चापि समेधयन्तम् ।
भूतानि सर्वाणि विराजयन्तं
ददर्श शीतांशुमथाभियान्तम् ॥४॥

---

[1] सुन्दरकाण्डे—पञ्चमः सर्गः।

[2] वानराणां वीराणां श्रेष्ठः महान् हनूमान्।

या भाति लक्ष्मीर्भुवि मन्दरस्था
यथा प्रदोषेषु च सागरस्था ।
तथैव तोयेषु च पुष्करस्था
रराज सा चारुनिशाकरस्था ॥५॥

हंसो यथा राजत-पञ्जरस्थः
सिंहो यथा मन्दर-कन्दरस्थः ।
वीरो यथा गर्वित-कुञ्जरस्थ-
श्चन्द्रोऽपि बभ्राज तथाम्बरस्थः ॥६॥

स्थितः ककुद्मानिव तीक्ष्णशृङ्गो
महाचलः श्वेत इवोच्चशृङ्गः ।
हस्तीव जाम्बूनदबद्धशृङ्गो
विभाति चन्द्रः परिपूर्णशृङ्गः ॥७॥

विनष्ट-शीताम्बु तुषारपङ्को
महाग्रहग्राहविनष्टपङ्कः
प्रकाशलक्ष्म्याश्रयनिर्मलाङ्को
रराज चन्द्रो भगवान् शशाङ्कः ॥८॥

शिलातलं प्राप्य यथा मृगेन्द्रो
महारणं प्राप्य यथा गजेन्द्रः ।
राज्यं समासाद्य यथा नरेन्द्र-
स्तथा प्रकाशो विरराज चन्द्रः ॥९॥

रावणशक्त्याहतस्य लक्ष्मणस्य पुनरुत्थानम्[1]

शक्त्या निपातितं दृष्ट्वा रावणेन बलीयसा ।
लक्ष्मणं समरे शूरं शोणितौघ-परिप्लुतम् ।
स दत्त्वा तुमुलं युद्धं रावणस्य दुरात्मनः ।
विसृजन्नेव बाणौघान् सुषेणमिदमब्रवीत् ॥१-२॥
"एष रावणवीर्येण लक्ष्मणः पतितो भुवि ।
सर्पवच्चेष्टते वीरो मम शोकमुदीरयन् ॥३॥
शोणितार्द्रमिमं वीरं प्राणैः प्रियतरं मम ।
पश्यतो मम का शक्तिर्योद्धुं पर्याकुलात्मनः ॥४॥
अयं स समरश्लाघी भ्राता मे शुभलक्षणः ।
यदि पञ्चत्वमापन्नः प्राणैर्मे किं सुखेन वा ? ॥५॥
लज्जतीव हि मे वीर्यं भ्रश्यतीव कराद्धनुः ।
सायका व्यवसीदन्ति दृष्टिर्बाष्पवशं गता ॥६॥
अवसीदन्ति गात्राणि स्वप्नयाने नृणामिव ।
चिन्ता मे जायते तीव्रा मुमूर्षा चोपजायते" ॥७॥

भ्रातरं निहतं दृष्ट्वा रावणेन दुरात्मना ।
विनिष्टनन्तं दुःखार्तं मर्मण्यभिहतं भृशम् ।
एवं विषादमापन्नो विललापाकुलेन्द्रियः ॥८॥

---

[1] युद्धकाण्डे—१०१-तमे सर्गे ।

[illegible]
[illegible]
[illegible] ॥९॥
किं मे युद्धेन । किं प्राणैर्युद्धे कार्यं न विद्यते,
यत्रायं निहतः शेते रणमूर्ध्नि लक्ष्मणः ॥१०॥
यथैव मां वने यान्तमनुयाति महाद्युतिः ।
अहमप्यनुयास्यामि तथैवैनं यमक्षयम् ॥११॥
देशे देशे कलत्राणि देशे देशे च बान्धवाः ।
तं तु देशं न पश्यामि यत्र भ्राता सहोदरः ॥१२॥
सीतया किं नु राज्येन जीवितेन किमद्य मे ?
किं नु वक्ष्याम्यहं त्वम्बां सुमित्रां पुत्रवत्सलाम् ॥१३॥
उपालम्भं न शक्ष्यामि सोढुं दत्तं सुमित्रया ।
किं नु वक्ष्यामि कौसल्यां मातरं किं नु कैकयीम् ? ॥१४॥
भरतं किं नु वक्ष्यामि शत्रुघ्नं च महाबलम् ?
सह तेन वनं यातो विना तेनागतः कथम् ? ॥१५॥
इहैव मरणं श्रेयो न तु बन्धुविगर्हणम् ।
किं मया दुष्कृतं कर्म कृतमन्यत्र जन्मनि ।
येन मे धार्मिको भ्राता निहतश्चाग्रतः स्थितः ? ॥१६॥
हा भ्रातर्मनुजश्रेष्ठ ! शूराणां प्रवर ! प्रभो !
एकाकी किं नु मां त्यक्त्वा परलोकाय गच्छसि ? ॥१७॥

विलपन्तं च मां भ्रातः! किमर्थं नावभाषसे ?
उत्तिष्ठ, पश्य, किं शेषे ? दीनं मां पश्य चक्षुषा ॥१८॥
शोकार्तस्य प्रमत्तस्य पर्वतेषु वनेषु च ।
विषण्णस्य महाबाहो ! समाश्वासयिता मम" ॥१९॥

राममेवं ब्रुवाणं तं शोकव्याकुलितेन्द्रियम् ।
आश्वासयन्नुवाचेदं सुषेणः परमं वचः ॥२०॥
"त्यजेमां नरशार्दूल ! बुद्धिं वैक्लव्यकारिणीम् ।
शोकसञ्जननीं चिन्तां तुल्यां बाणैश्चमूमुखे ॥२१॥
नैव पञ्चत्वमापन्नो लक्ष्मणो लक्ष्मिवर्धनः ।
न ह्यस्य विकृतं वक्त्रं न च श्यामं न निष्प्रभम् ॥२२॥
सुप्रभं च प्रसन्नं च मुखमस्य निरीक्ष्यताम् ।
पद्मपत्रतलौ हस्तौ, सुप्रसन्ने च लोचने ॥२३॥
नेदृशं दृश्यते रूपं गतासूनां विशाम्पते !
विषादं मा कृथा वीर ! सप्राणोऽयमरिन्दमः ॥२४॥
आख्याति तु प्रसुप्तस्य स्रस्तगात्रस्य भूतले ।
सोच्छ्वासं हृदयं वीर ! कम्पमानं मुहुर्मुहुः" ॥२५॥

एवमुक्त्वा महाप्राज्ञः सुषेणो राघवं वचः ।
समीपस्थमुवाचेदं हनुमन्तं महाकपिम् ॥२६॥
"सौम्य ! शीघ्रमितो गत्वा शैलमोषधिपर्वतम् ।
दक्षिणे शिखरे जातां महौषधिमिहानय ॥२७॥

विशल्यकरणीं नाम्ना सावर्ण्यकरणीं तथा ।
सञ्जीवकरणीं वीर ! सन्धानीं च महौषधिम् ।
सञ्जीवनार्थं वीरस्य लक्ष्मणस्य त्वमानय" ॥२८॥

इत्येवमुक्तो हनुमान् गत्वा चौषधिपर्वतम् ।
चिन्तामभ्यगमच्छ्रीमानजानंस्ता महौषधिम् ॥२९॥
तस्य बुद्धिः समुत्पन्ना मारुतेरमितौजसः ।
"इदमेव गमिष्यामि गृहीत्वा शिखरं गिरेः ॥३०॥
अस्मिन् हि शिखरे जातामोषधिं तां सुखावहाम् ।
प्रतर्केणावगच्छामि सुषेणो ह्येवमब्रवीत् ॥३१॥
अगृह्य यदि गच्छामि विशल्यकरणीमहम् ।
कालात्ययेन दोषः स्याद् वैक्लव्यं च महद् भवेत्" ॥३२॥

इति सञ्चिन्त्य हनुमान् गत्वा क्षिप्रं महाबलः ।
आसाद्य पर्वतश्रेष्ठं त्रिः प्रकम्प्य गिरेस्तटम् ।
फुल्लनानातरुगणं समुत्पाट्य महाबलः ।
गृहीत्वा हरिशार्दूलो हस्ताभ्यां समतोलयत् ॥३३-३४॥
स नीलमिव जीमूतं तोयपूर्णं नभस्तलात् ।
उत्पपात गृहीत्वा तु हनूमान् शिखरं गिरेः ॥३५॥

समागम्य महावेगः सन्यस्य शिखरं गिरेः ।
विश्रम्य किञ्चिद्धनुमान् सुषेणमिदमब्रवीत् ॥३६॥
"ओषधीं नावगच्छामि तामहं हरिपुङ्गव ।
तदिदं शिखरं कृत्स्नं गिरेस्तस्याहृतं मया" ॥३७॥

एवं कथयमानं तु प्रशस्य पवनात्मजम् ।
सुषेणो वानरश्रेष्ठो जग्राहोत्पाट्य चौषधिम् ॥३८॥
विस्मितास्तु बभूवुस्ते सर्वे वानरयूथपाः ।
दृष्ट्वा तु हनुमत्कर्म सुरैरपि सुदुष्करम् ॥३९॥
ततः सङ्क्षोदयित्वा तामोषधिं वानरोत्तमः ।
लक्ष्मणस्य ददौ नस्तः सुषेणः सुमहाद्युतिः ॥४०॥
सशल्यः स समाघ्राय लक्ष्मणः परवीरहा ।
विशल्यो विरुजः शीघ्रमुदतिष्ठन्महीतलात् ॥४१॥
समुत्थितं तु हरयो भूतलात्प्रेक्ष्य लक्ष्मणम् ।
"साधु साध्वि"ति सुप्रीताः लक्ष्मणं प्रत्यपूजयन् ॥४२॥
"एह्येही"त्यब्रवीद्रामो लक्ष्मणं परवीरहा ।
सस्वजे गाढमालिङ्ग्य बाष्पपर्याकुलेक्षणः ॥४३॥
अब्रवीच्च परिष्वज्य सौमित्रिं राघवस्तदा ।
"दिष्ट्या त्वां वीर ! पश्यामि मरणात् पुनरागतम् ॥४४॥
न हि मे जीवितेनार्थः, सीतया च, जयेन वा ।
को हि मे जीवितेनार्थस्त्वयि पञ्चत्वमागते ?" ॥४५॥
इत्येवं ब्रुवतस्तस्य राघवस्य महात्मनः ।
खिन्नः शिथिलया वाचा लक्ष्मणो वाक्यमब्रवीत् ॥४६॥
"तां प्रतिज्ञां प्रतिज्ञाय पुरा सत्यपराक्रम !
लघुः कश्चिदिवासत्त्वो नैवं त्वं वक्तुमर्हसि ॥४७॥
न हि प्रतिज्ञां कुर्वन्ति वितथां सत्यवादिनः ।
लक्षणं हि महत्त्वस्य प्रतिज्ञा परिपालनम् ॥४८॥

नैराश्यमुपगन्तुं च नालं ते मनुजेश्वर ।
वधेन रावणस्याद्य प्रतिज्ञामनुपालय ॥४९॥
न जीवन् यास्यते शत्रुस्तव बाणवशं गतः ।
नर्दतस्तीक्ष्णदंष्ट्रस्य सिंहस्येव महागजः ॥५०॥
अहं तु वधमिच्छामि शीघ्रमस्य दुरात्मनः ।
यावदस्तं न यात्येष कृतकर्मा दिवाकरः ॥५१॥

यदि वधमिच्छसि रावणस्य संख्ये
यदि च कृतां हि तवेच्छसि प्रतिज्ञाम् ।
यदि तव राजसुताभिलाष आर्य ।
कुरु च वचो मम शीघ्रमद्य वीर ।" ॥५२॥

रामाश्वमेधसभायां वाल्मीकेराज्ञया कुशीलवयो रामायणगानम्, सीतायाः पातालप्रवेशश्च[1]

तौ रजन्यां प्रभातायां स्नातौ हुतहुताशनौ ।
यथोक्तमृषिणा पूर्वं सर्वं तत्रोपगायताम् ॥१॥
तां स शुश्राव काकुत्स्थः पूर्वाचार्य-विनिर्मिताम् ।
अपूर्वां पाठ्यजातिं च गेयेन समलङ्कृताम् ॥२॥

---

[1] उत्तरकाण्डे—९४-तमे सर्गे ।

समाप्येवं तु निबद्धां तन्त्रीलयसमन्विताम् ।
बालाभ्यां राघवः श्रुत्वा कौतूहलपरोऽभवत् ॥३॥

अथ कर्मान्तरे राजा समाहूय महामुनिम् ।
पार्थिवांश्च नरव्याघ्रः पण्डितान् नैगमांस्तथा ॥
पौराणिकान् शब्दविदो ये च वृद्धा द्विजातयः ।
स्वराणां लक्षणज्ञांश्च प्रोत्सुकान् द्विजसत्तमान् ॥
पादाक्षरसमासज्ञांश्छन्दःसु परिनिष्ठितान् ।
कलामात्राविशेषज्ञान् ज्योतिषे च परं गतान् ॥
क्रियाकल्पविदश्चैव तथा कार्यविशारदान् ।
हेतूपचारकुशलान् हैतुकांश्च बहुश्रुतान् ॥
छन्दोविदः पुराणज्ञान् वैदिकान् द्विजसत्तमान् ।
चित्रज्ञान् वृत्तसूत्रज्ञान् नृत्यगीतविशारदान् ।
एतान् सर्वान् समाहूय गातारौ समवेशयत् ॥४-८॥

तेषां संवदतां तत्र श्रोतॄणां हर्षवर्धनम् ।
गेयं प्रचक्रतुस्तत्र तावुभौ मुनिदारकौ ॥९॥
ततः प्रवृत्तं मधुरं गान्धर्वमतिमानुषम् ।
न च तृप्तिं ययुः सर्वे श्रोतारो गेयसम्पदा ॥१०॥
हृष्टा मुनिगणाः सर्वे पार्थिवाश्च महौजसः ।
पिबन्त इव चक्षुर्भिः पश्यन्ति स्म मुहुर्मुहुः ॥११॥
ऊचुः परस्परं चेदं सर्व एव समाहिताः ।
“उभौ रामस्य सदृशौ बिम्बाद् बिम्बमिवोद्धृतौ ॥१२॥

जटिनौ यदि न स्यातां न वल्कलधरौ यदि ।
विशेषं नाधिगच्छामो गायतो राघवस्य च" ॥१३॥
ततोऽपराह्णसमये राघवः समभाषत ।
"अष्टादश सहस्राणि सुवर्णस्य महात्मनोः ।
प्रयच्छ शीघ्रं काकुत्स्थ ! यदन्यदभिकाङ्क्षितम्" ।
ददौ स शीघ्रं काकुत्स्थो बालयोर्वै पृथक् पृथक् ॥१४-१५॥
दीयमानं सुवर्णं तु नाग्रह्णातां कुशीलवौ ।
ऊचतुश्च महात्मानौ किमनेनेति विस्मितौ ॥१६॥
"वन्येन फलमूलेन निरतौ वनवासिनौ ।
सुवर्णेन हिरण्येन किं करिष्यावहे वने ?" ॥१७॥
तथा तयोः प्रब्रुवतोः कौतूहलसमन्विताः ।
श्रोतारश्चैव रामश्च सर्व एव सुविस्मिताः ॥१८॥
तस्य चैवागमं रामः काव्यस्य श्रोतुमुत्सुकः ।
पप्रच्छ सुमहातेजास्तावुभौ मुनिदारकौ ॥१९॥
"किंप्रमाणमिदं काव्यं, का प्रतिष्ठा महात्मनः ?
कर्ता काव्यस्य महतः क्व चासौ मुनिपुङ्गवः ?" ॥२०॥
पृच्छन्तं राघवं वाक्यमूचतुर्मुनिदारकौ ।
"वाल्मीकिर्भगवान् कर्ता सम्प्राप्तो यज्ञसंविधम् ॥२१॥
चादिप्रभृति वै राजन् ! पञ्च सर्गशतानि च ।
काण्डानि षट् कृतानीह सोत्तराणि महात्मना ॥२२॥
कृतानि गुरुणाऽस्माकमृषिणा चरितं तव ।
प्रतिष्ठा जीवितं यावत् तावत् सर्वस्य वर्तते ॥२३॥

यदि बुद्धिः कृता राजन् ! श्रवणाय महायश !
कर्मान्तरे क्षणीभूतस्तत्कुरुष्व महाभुजः" ॥२४॥
"बाढ"मित्यब्रवीद्रामस्तौ चानुज्ञाप्य राघवौ ।
प्रहृष्टौ जग्मतुः स्थानं यत्रास्ते मुनिपुङ्गवः ॥२५॥

रामो बहून्यहान्येव तद् गीतं परमं शुभम् ।
शुश्राव मुनिभिः सार्धं पार्थिवैः सह वानरैः ॥२६॥
तस्मिन् गीते तु विज्ञाय सीतापुत्रौ कुशीलवौ ।
तस्याः परिषदो मध्ये रामो वचनमब्रवीत् ॥२७॥
दूतान् शुद्धसमाचारानाहूयात्ममनीषया ।
"मद्वचो ब्रूत गच्छध्वमितो भगवतोऽन्तिके ॥२८॥
'यदि शुद्धसमाचारा यदि वा वीतकल्मषा ।
करोत्विहात्मनः शुद्धिमनुमान्य महामुनिम्' ॥२९॥
छन्दं मुनेश्च विज्ञाय सीतायाश्च मनोगतम् ।
प्रत्ययं दातुकामायास्ततः शंसत मे लघु ॥३०॥
श्वः प्रभाते तु शपथं मैथिली जनकात्मजा ।
करोतु परिषन्मध्ये शोधनार्थं ममैव च" ॥३१॥

श्रुत्वा तु राघवस्यैतद्वचः परममद्भुतम् ।
दूताः सम्प्रययुर्वाटं यत्र वै मुनिपुङ्गवः ॥३२॥
ते प्रणम्य महात्मानं ज्वलन्तममितप्रभम् ।
ऊचुस्ते रामवाक्यानि मृदूनि मधुराणि च ॥३३॥
तेषां तद्भाषितं श्रुत्वा रामस्य च मनोगतम् ।
विज्ञाय सुमहातेजा मुनिर्वाक्यमथाब्रवीत् ॥३४॥

"एवं भवतु, भद्रं वो, यथा वदति राघवः ।
मया अन्विष्यते सीता, दैवतं हि पतिः स्त्रियाः" ॥३५॥
तथोक्ता मुनिना तेन राजदूता महौजसः ।
प्रत्येत्य राघवं सर्वे मुनिवाक्यं बभाषिरे ॥३६॥
ततः प्रहृष्टः काकुत्स्थः श्रुत्वा वाक्यं महात्मनः ।
ऋषीन्द्राय नमस्कृत्य राम इदं वाक्यमभाषत ॥३७॥
"भगवन्तः सशिष्या ये मानुषाश्च नराधिपाः ।
पश्यन्तु सीताशपथं यश्चैवान्योऽपि काङ्क्षते" ॥३८॥
तस्य तद् वचनं श्रुत्वा राघवस्य महात्मनः ।
सर्वेषामृषिमुख्यानां साधुवादो महानभूत् ॥३९॥
राजानश्च महात्मानः प्रशंसन्ति स्म राघवम् ।
"उपपन्नं नरश्रेष्ठ ! त्वय्येव भुवि नान्यतः" ॥४०॥
एवं विनिश्चयं कृत्वा "श्वोभूते" इति राघवः ।
विसर्जयामास तदा सर्वांस्तान् शत्रुसूदनः ॥४१॥
तस्यां रजन्यां व्युष्टायां यज्ञवाटं गतो नृपः ।
ऋषीन् सर्वान् महातेजाः शब्दापयति राघवः ॥४२॥
अथ तत्र समाजग्मुर्मुनयः संशितव्रताः ।
कौतूहलसमाविष्टाः सर्व एव समन्ततः ॥४३॥
राक्षसाश्च महावीर्या वानराश्च महाबलाः ।
क्षत्रिया ये च शूद्राश्च वैश्याश्चैव सहस्रशः ॥४४॥
नानादेशागताश्चैव ब्राह्मणाः संशितव्रताः ।
सीताशपथवीक्षार्थं सर्व एव समागताः ॥४५॥

तदा समागमे सर्वमासमभूत्स्तिमितासनम् ।
श्रुत्वा मुनिवरस्तूर्णं समीप मनुपागमत् ॥४६॥
तमृषिं पृष्ठतः सीता अन्वगच्छदवाङ्मुखी ।
रामं मनोगतं कृत्वा साश्रुनेत्रा कृताञ्जलिः ॥४७॥
तां दृष्ट्वा श्रुतिमायान्तीं ब्रह्माणमनुगामिनीम् ।
वाल्मीकेः पृष्ठतः सीतां साधुवादो महानभूत् ॥४८॥
ततो हलहलाशब्दः सर्वेषामेवमाबभौ ।
दुःखजन्मविशालेन शोकेनाकुलितात्मनाम् ॥४९॥
"साधु रामे"ति केचित्तु "साधु सीते"ति चापरे ।
"उभावेव" च तत्रान्ये प्रेक्षकाः सम्प्रचुक्रुशुः ॥५०॥
ततो मध्ये जनौघस्य प्रविश्य मुनिपुङ्गवः ।
सीतासहायो वाल्मीकिरिति होवाच राघवम् ॥५१॥
"इयं दाशरथे! सीता सुव्रता धर्मचारिणी ।
अपवादात् परित्यक्ता ममाश्रम-समीपतः ॥५२॥
लोकापवाद-भीतस्य तव राम! महाव्रत !
प्रत्ययं दास्यते सीता तामनुज्ञातुमर्हसि ॥५३॥
इमौ च जानकीपुत्रावुभौ च यमजातकौ ।
सुतौ तवैव दुर्धर्षौ सत्यमेतद् ब्रवीमि ते ॥५४॥
प्रचेतसोऽहं दशमः पुत्रो राघवनन्दन !
न स्मराम्यनृतं वाक्यमिमौ हि तव पुत्रकौ ॥५५॥
बहुवर्षसहस्राणि तपश्चर्या मया कृता ।
नोपाश्नीयां फलं तस्या दुष्टेयं यदि मैथिली ॥५६॥

मनसा, कर्मणा, वाचा भूतपूर्वं न किल्बिषम् ।
तस्याहं फलमश्नामि अपापा मैथिली यदि ॥७॥
अहं पञ्चसु भूतेषु मनःषष्ठेषु राघव ।
विचिन्त्य सीतां शुद्धेति जग्राह वननिर्झरे ॥८॥
इयं शुद्धसमाचारा अपापा पतिदेवता ।
लोकापवादभीतस्य प्रत्ययं तव दास्यति ॥९॥

तस्मादियं नरवरात्मज ! शुद्धभावा
दिव्येन दृष्टिविषयेण मया प्रदिष्टा ।
लोकापवादकलुषीकृतचेतसा यत्
त्यक्ता त्वया प्रियतमा विदिताऽपि शुद्धा" ॥१०॥

वाल्मीकिनैवमुक्तस्तु राघवः प्रत्यभाषत ।
प्राञ्जलिर्जगतां मध्ये दृष्ट्वा तां वरवर्णिनीम् ॥११॥

"एवमेतन्महाभाग ! यथा वदसि धर्मवित् !
प्रत्ययस्तु मम ब्रह्मंस्तव वाक्यैरकल्मषैः ॥१२॥
प्रत्ययश्च पुरा दत्तो वैदेह्या सुरसन्निधौ ।
शपथश्च कृतस्तत्र तेन वेश्म प्रवेशिता ॥१३॥
लोकापवादो बलवान् येन त्यक्ता हि मैथिली ।
सेयं लोकभयाद् ब्रह्मन्नपापेत्यभिजानता ।
परित्यक्ता मया सीता तद्भवान् क्षन्तुमर्हति ॥१४॥
जानामि चेमौ पुत्रौ मे यमजातौ कुशीलवौ ।
शुद्धायां जगतो मध्ये वैदेह्यां प्रीतिरस्तु मे" ॥१५॥

अभिप्रायं तु विज्ञाय रामस्य सुरसत्तमाः ।
सीतायाः शपथे तस्मिन् सर्व एव समागताः ॥६६॥
पितामहं पुरस्कृत्य सर्व एव समागताः ।
आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ॥६७॥
साध्याश्च देवाः सर्वे ते सर्वे च परमर्षयः ।
नागाः सुपर्णाः सिद्धाश्च ते सर्वे हृष्टमानसाः ।
सीता-शपथसम्भ्रान्ताः सर्व एव समागताः ॥६८॥
दृष्ट्वा देवानृषींश्चैव राघवः पुनरब्रवीत् ।
प्रत्ययो मे मुनिश्रेष्ठ ! ऋषिवाक्यैरकल्मषैः ।
शुद्धायां जगतो मध्ये वैदेह्यां प्रीतिरस्तु मे" ॥६९॥
ततो वायुः शुभः पुण्यो दिव्यगन्धो मनोरमः ।
तं जनौघं सुरश्रेष्ठो ह्लादयामास सर्वतः ॥७०॥
तदद्भुतमिवाचिन्त्यं निरैक्षन्त समाहिताः ।
मानवाः सर्वराष्ट्रेभ्यः पूर्वं कृतयुगे यथा ॥७१॥
सर्वान् समागतान् दृष्ट्वा सीता काषायवासिनी ।
अब्रवीत् प्राञ्जलिर्वाक्यमधोदृष्टिरवाङ्मुखी ॥७२॥
"यथाहं राघवादन्यं मनसापि न चिन्तये ।
तथा मे माधवी देवी विवरं दातुमर्हति ॥७३॥
मनसा, कर्मणा, वाचा यथा रामं समर्चये ।
तथा मे माधवी देवी विवरं दातुमर्हति ॥७४॥
यथैतत् सत्यमुक्तं मे, वेद्मि रामात् परं न च ।
तथा मे माधवी देवी विवरं दातुमर्हति" ॥७५॥

तथा शपन्त्यां वैदेह्यां प्रादुरासीत् तदद्भुतम्।
भूतलादुत्थितं दिव्यं सिंहासनमनुत्तमम् ॥७६॥
ध्रियमाणं शिरोभिस्तु नागैरमितविक्रमैः।
दिव्यं दिव्येन वपुषा दिव्यरत्नविभूषितैः ॥७७॥
तस्मिंस्तु धरणी देवी बाहुभ्यां गृह्य मैथिलीम्।
स्वागतेनाभिनन्द्यैनामासने चोपवेशयत् ॥७८॥
तामासनगतां दृष्ट्वा प्रविशन्तीं रसातलम्।
पुष्पवृष्टिरविच्छिन्ना दिव्या सीतामवाकिरत् ॥७९॥
साधुकारश्च सुमहान् देवानां सहसोत्थितः।
"साधु साध्विति वै सीते। यस्यास्ते शीलमीदृशम्" ॥८०॥
एवं बहुविधा वाचो ह्यन्तरिक्षगताः सुराः।
व्याजह्रुर्हृष्टमनसो दृष्ट्वा सीताप्रवेशनम् ॥८१॥
यज्ञवाट-गताश्चापि मुनयः सर्व एव ते।
राजानश्च नरव्याघ्रा विस्मयान्नोपरेमिरे ॥८२॥
अन्तरिक्षे च भूमौ च सर्वे स्थावरजङ्गमाः।
दानवाश्च महाकायाः पाताले पन्नगाधिपाः ॥८३॥
केचिद् विनेदुः संहृष्टाः, केचिद् ध्यानपरायणाः।
केचिद्रामं निरीक्षन्ते, केचित् सीतामचेतसः ॥८४॥
सीताप्रवेशनं दृष्ट्वा तेषामासीत् समागमः।
तन्मुहूर्तमिवात्यर्थं समं सम्मोहितं जगत् ॥८५॥

महाभारतम्

नलोपाख्यानम्[1]

आसीद्राजा नलो नाम वीरसेनसुतो बली ।
उपपन्नो गुणैरिष्टै रूपवानश्वकोविदः ॥१॥
अतिष्ठन्मनुजेन्द्राणां मूर्ध्नि देवपतिर्यथा ।
ब्रह्मण्यो वेदविच्छूरो निषधेषु महीपतिः ॥२॥
तथैवासीद् विदर्भेषु भीमो भीमपराक्रमः ।
तस्मै प्रसन्नो दमनः सभार्याय वरं ददौ ॥
कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः ।
दमयन्तीं, दमं, दान्तं, दमनं च सुवर्चसम् ॥३॥
दमयन्ती तु रूपेण तेजसा यशसा श्रिया ।
सौभाग्येन च लोकेषु यशः प्राप सुमध्यमा ॥४॥
नलोऽपि नरशार्दूलो लोकेष्वप्रतिमो भुवि ।
तयोरदृष्टः कामोऽभूच्छृण्वतोः सततं गुणान् ॥५॥
स ददर्श ततो हंसान् जातरूप-परिष्कृतान् ।
वने विचरतां तेषामेकं जग्राह पक्षिणम् ॥६॥
ततोऽन्तरिक्षगो वाचं व्याजहार नलं तदा ।
"हन्तव्योऽस्मि न ते राजन् ! करिष्यामि तव प्रियम् ॥७॥
दमयन्तीसकाशे त्वां कथयिष्यामि नैषध !
यथा त्वदन्यं पुरुषं न सा मंस्यति कर्हिचित्" ॥८॥

---

१ वनपर्वणि—५० तमेऽध्याये। (Kumbakonam Edition)

एवमुक्तवतो हंसानुत्ससर्ज नलोऽवनिपः ।
ते तु हंसाः समुत्पत्य विदर्भानगमंस्ततः ॥९॥
विदर्भनगरीं गत्वा दमयन्त्यास्तदान्तिके ।
निपेतुस्ते गरुत्मन्तः, सा ददर्श च तान् खगान् ॥१०॥
सा तानद्भुतरूपान् वै दृष्ट्वा सखिगणावृता ।
हृष्टा ग्रहीतुं खगमांस्त्वरमाणोपचक्रमे ॥११॥
दमयन्ती तु यं हंसं समुपाधावदन्तिके ।
स मानुषीं गिरं कृत्वा दमयन्तीमथाब्रवीत् ॥१२॥
"दमयन्ति ! नलो नाम निषधेषु महीपतिः ।
अश्विनोः सदृशो रूपे न समास्तस्य मानुषाः ॥१३॥
तस्य वै यदि भार्या त्वं भवेथा वरवर्णिनि !
सफलं ते भवेज्जन्म रूपं चेदं सुमध्यमे ! ॥१४॥
त्वं चापि रत्नं नारीणां नरेषु च नलो वरः ।
विशिष्टाया विशिष्टेन सङ्गमो गुणवान् भवेत्" ॥१५॥
एवमुक्ता तु हंसेन दमयन्ती विशाम्पते !
अब्रवीत् तत्र तं हंसं "त्वमप्येवं नले वद" ॥१६॥
"तथे"त्युक्त्वाण्डजः कन्यां विदर्भस्य विशाम्पते !
पुनरागम्य निषधान् नले सर्वं न्यवेदयत् ॥१७॥
ततश्चिन्तापरा दीना विवर्णवदना कृशा ।
बभूव दमयन्ती तु निःश्वासपरमा सदा ॥१८॥
समीक्ष्य च महीपालः स्वां सुतां प्राप्तयौवनाम् ।
अपश्यदात्मना कार्यं दमयन्त्याः स्वयंवरम् ॥१९॥

तच्छ्रुत्वा पृथिवीपालाः सर्वे हृच्छय-पीड़िताः ।
त्वरिताः समुपाजग्मुर्दमयन्तीमभीप्सवः ॥२०॥
नलोऽपि राजा कौन्तेय ! श्रुत्वा राज्ञां समागमम् ।
अभ्यगच्छददीनात्मा दमयन्तीमनुव्रतः ॥२१॥
 दमयन्ती ततो रङ्गं प्रविवेश शुभानना ।
मुष्णन्ती प्रभया राज्ञां चक्षूंषि च मनांसि च ॥२२॥
नैषधं वरयामास भैमी धर्मेण पाण्डव ।
स्कन्धदेशेऽसृजत्तस्य स्रजं परमशोभनाम् ॥२३॥
पार्थिवाश्चानुभूयास्य विवाहं विस्मयान्विताः ।
दमयन्त्याश्च मुदिताः प्रतिजग्मुर्यथागतम् ॥२४॥
अवाप्य नारीरत्नं तु पुण्यश्लोकोऽपि पार्थिवः ।
रेमे सह तया राजन् ! शच्येव बलवृत्रहा ॥२५॥
जनयामास च ततो दमयन्त्यां महामनाः ।
इन्द्रसेनं सुतञ्चापि इन्द्रसेनां च कन्यकाम् ॥२६॥
 वृते तु नैषधे भैम्या लोकपाला महौजसः ।
यान्तो ददृशुरायान्तं द्वापरं कलिना सह ॥२७॥
अथाब्रवीत् कलिं शक्रः सम्भाष्य बलवृत्रहा ।
"द्वापरेण सहायेन कले ! ब्रूहि क्व यास्यसि" ॥२८॥
ततोऽब्रवीत् कलिः शक्रं "दमयन्त्याः स्वयंवरम् ।
गत्वा हि वरयिष्ये तां, मनो हि मम तां गतम्" ॥२९॥
तमब्रवीत् प्रहस्येन्द्रो "निर्वृत्तः स स्वयंवरः ।
वृतस्तया नलो राजा पतिरस्मत्समीपतः" ॥३०॥

[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible]
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ।
[illegible]
[illegible] ॥

...वचमि ततो राजा समाह्वाने महामनाः ।
...स-मद-मत्तस्य सुहृदां न तु कस्यन ।
...ारथिरभवच्छ्रुत्वा दीव्यमानमरिन्दमम् ॥४१-४२॥
...ा तदभवद् द्यूतं पुष्करस्य नलस्य च ।
...ष्ठिर ! बहून् मासान्, पुण्यश्लोकस्त्वजीयत ॥४३॥

दमयन्ती ततो दृष्ट्वा पुण्यश्लोकं नराधिपम् ।
...मत्तवदुन्मत्तं देवने गतचेतसम् ।
...भयशोकसमाविष्टा राजन् ! भीमसुता ततः ।
...न्तयामास तत्कार्यं सुमहत् पार्थिवं प्रति ॥४४॥
...ः शङ्कमाना तत्पापं चिकीर्षन्ती च तत्प्रियम् ।
...लञ्च हृतसर्वस्वमुपलभ्येदमब्रवीत् ।
...बृहत्सेनामतियशां तां धात्रीं परिचारिकाम् ।
...सूतमानय कल्याणि ! महत् कार्यमुपस्थितम्" ॥४५-४६॥
...बृहत्सेना तु सा श्रुत्वा दमयन्त्याः प्रभाषितम् ।
...वार्ष्णेयमानयामास पुरुषैराप्तकारिभिः ॥४७॥

वार्ष्णेयं तु ततो भैमी सान्त्वयच्छ्लक्ष्णया गिरा ।
...वाच देशकालज्ञा प्राप्तकालमनिन्दिता ॥४८॥
...नलस्य दयितानश्वान् योजयित्वा मनोजवान् ।
...दमारोप्य मिथुनं कुण्डिनं यातुमर्हसि ॥४९॥
...म ज्ञातिषु निक्षिप्य दारकौ स्यन्दनं तथा ।
...अश्वांश्चेमान् यथाकामं वस चान्यत्र गच्छ वा" ॥५०॥

हमरकम्याम्यु महाकर्म कल्मीयो लक्ष्मारयिः ।
कैटभदानैर्मेन मनामा[illegible]मुख्यमः ॥५१॥
मैः समीप विनिर्मिचा मोऽस्मानो मणीपर्ण !
नमो विष्णुममातीया विद्धीमोन माविना ॥५२॥
[illegible] विनिर्जिया मुनो स्वनर्द न नम् ।
[illegible] न नो [illegible] न [illegible] ।
[illegible] माद [illegible] गानम् नर्ग मुनम् ।
[illegible] ॥५३॥
[illegible] लिनः ।
[illegible] ॥५४॥
[illegible] ।
[illegible] ॥५५॥
[illegible] ।
[illegible] ॥५६॥
[illegible] ।
[illegible] ॥५७॥
[illegible] ।
[illegible] ॥५८॥
[illegible] ।
[illegible] ।
[illegible] ।
[illegible]

क्षुधया पीड्यमानस्तु नलो बहुतिथेऽहनि ।
अपश्यच्छकुनान् कांश्चिद्धिरण्यसदृशच्छदान् ॥६१॥
स चिन्तयामास तदा निषधाधिपतिर्बली ।
"अस्ति भक्ष्यो ममाद्यायं वसु चेदं भविष्यति" ॥६२॥
ततस्तान् परिधानेन वाससा स समावृणोत् ।
तस्य तद्वस्त्रमादाय सर्वे जग्मुर्विहायसा ॥६३॥
उत्पतन्तः खगा वाक्यमेतदाहुस्ततो नलम् ।
दृष्ट्वा दिग्वाससं भूमौ स्थितं दीनमधोमुखम् ॥६४॥
"वयमक्षाः सुदुर्बुद्धे ! तव वासो जिहीर्षवः ।
आगता न हि नः प्रीतिः सवाससि गते त्वयि" ॥६५॥
तान् समीक्ष्य गतानक्षानात्मानं च विवाससम् ।
पुण्यश्लोकस्तदा राजन् ! दमयन्तीमथाब्रवीत् ॥६६॥
"येषां प्रकोपादैश्वर्यात् प्रच्युतोऽहमनिन्दिते !
इमे ते शकुना भूत्वा वासो भीरु ! हरन्ति मे ॥६७॥
वैषम्यं परमं प्राप्तो दुःखितो हतचेतनः ।
भर्त्ता तेऽहं निबोधेदं वचनं हितमात्मनः ॥६८॥
एष पन्था विदर्भाणामसौ गच्छति कोशलान् ।
अतः परं च देशोऽयं दक्षिणो दक्षिणापथः" ॥६९॥
एतद्वाक्यं नलो राजा दमयन्तीं समाहितः ।
उवाचासकृदार्तो हि भैमीमुद्दिश्य भारत ! ॥७०॥
ततः सा बाष्पाकुलया वाचा दुःखेन कर्षिता ।
उवाच दमयन्ती तं नैषधं करुणं वचः ॥७१॥

"[illegible] मे [illegible] [illegible] ।
[illegible] । [illegible] [illegible] पुनः पुनः ॥ [illegible]
[illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] [illegible] ॥ [illegible]
[illegible] मे [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] । [illegible] [illegible] ॥ [illegible]
न च [illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] [illegible]" ॥ [illegible]

[illegible]

"[illegible] [illegible] [illegible] । [illegible] !
[illegible] [illegible] [illegible] [illegible] [illegible] [illegible]
न [illegible] [illegible], [illegible] [illegible] ! [illegible]
[illegible] न [illegible] [illegible] !" [illegible]

[illegible]

"[illegible] [illegible] [illegible] । [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] [illegible] । [illegible]
[illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] [illegible] !

नल उवाच—

"यथा राज्यं तव पितुस्तथा मम न संशयः ।
न तु तत्र गमिष्यामि विषमस्थः कथञ्चन ॥८१॥
कथं समृद्धो गत्वाहं तव हर्षविवर्धनः ।
परिद्यूतो गमिष्यामि तव शोकविवर्धनः ?" ॥८२॥
इति ब्रुवन्नलो राजा दमयन्तीं पुनः पुनः ।
सान्त्वयामास कल्याणीं वाससोऽर्धेन संवृताम् ॥८३॥

तावेकवस्त्रसंवीतावटमानावितस्ततः ।
क्षुत्पिपासा परिश्रान्तौ सभां काञ्चिदुपेयतुः ॥८४॥
तां सभामुपसम्प्राप्य तदा स निषधाधिपः ।
वैदर्भ्या सहितो राजा निषसाद महीतले ॥८५॥
सुप्तायां दमयन्त्यां तु नलो राजा विशाम्पते ।
शोकोन्मथितचित्तः सन् न स्म शेते यथा पुरा ॥८६॥
स विनिश्चित्य बहुधा विचार्य च पुनः पुनः ।
उत्सर्गं मन्यते श्रेयो दमयन्त्या नराधिप ! ॥८७॥
सोऽवकृष्य कलिना मोहितः प्राद्रवन्नलः ।
सुप्तामुत्सृज्य तां भार्यां विलप्य करुणं बहु ॥८८॥

अपक्रान्ते नले राजन् ! दमयन्ती गतक्लमा ।
अबुध्यत वरारोहा सन्त्रस्ता विजने वने ॥८९॥
अपश्यमाना भर्तारं शोक-दुःखसमन्विता ।
प्राक्रोशदुच्चैः सन्त्रस्ता "महाराजे"ति नैषधम् ॥९०॥

[illegible]
[illegible]
[illegible]
[illegible] १२.९१
[illegible]
[illegible] १२.९२
[illegible]
[illegible] १२.९३

सा ग्रस्यमाना ग्राहेण शोकेन च [illegible] ।
[illegible] शोचति तथा यथा शोचति नैषधम् ॥ १२.९४
श्रान्तस्य ते क्षुधार्तस्य परिग्लानस्य नैषध !
कः श्रमं राजशार्दूल ! नाशयिष्यति मानद !” १२.९५
ततः कश्चिन्मृगव्याधो विचरन् गहने वने ।
आक्रन्दमानां संश्रुत्य जवेनाभिससार च ॥ १२.९६
तां तु दृष्ट्वा तथा ग्रस्तामजगरेणायतेक्षणाम् ।
मुखतः पातयामास शस्त्रेण निशितेन च ॥ १२.९७

मोक्षयित्वा च तां व्याधः प्रक्षाल्य सलिलेन च ।
समाश्वास्य कृताहारामथ पप्रच्छ भारत ! १२.९८
कस्य त्वं मृगशावाक्षि ! कथं चाभ्यागता वनम् ?
कथं चेदं महत् कृच्छ्रं प्राप्तवत्यसि भामिनि !” १२.१००
दमयन्ती तथा तेन पृच्छ्यमाना विशाम्पते !
सर्वमेतद् यथावृत्तमाचचक्षेऽस्य भारत ! १२.१०१

तामर्धवस्त्रसंवीतां पूर्णचन्द्रनिभाननाम् ।
लक्षयित्वा मृगव्याधः कामस्य वशमेयिवान् ॥१०२॥
दमयन्त्यपि तं दुष्टमुपलभ्य पतिव्रता ।
तीव्ररोष-समाविष्टा प्रजज्वालेव मन्युना ॥१०३॥
स तु पापमतिः क्षुद्रः प्रधर्षयितुमातुरः ।
दुर्धर्षां तर्कयामास दीप्तामग्निशिखामिव ॥१०४॥
दमयन्ती तु दुःखार्ता पतिराज्यविनाकृता ।
अतीत-वाक्पथे काले शशापैनं रुषान्विता ॥१०५॥
"यद्यहं नैषधादन्यं मनसापि न चिन्तये ।
तदायं पततु क्षुद्रः परासुर्मृगजीवनः." ॥१०६॥
उक्तमात्रे तु वचने तया स मृगजीवनः ।
व्यसुः पपात मेदिन्यामग्निदग्ध इव द्रुमः ॥१०७॥

सा निहत्य मृगव्याधं प्रतस्थे कमलेक्षणा ।
वनं प्रतिभयं शून्यं झिल्लिकागण-नादितम् ॥१०८॥
दारुणामटवीं प्राप्य भर्तृव्यसनपीडिता ।
विदर्भ-तनया राजन् ! विललाप सुदुःखिता ॥१०९॥
दमयन्ती ततो भूयो जगाम दिशमुत्तराम् ।
सा गत्वा त्रीनहोरात्रान् ददर्श परमाङ्गना ।
तापसारण्यमतुलं दिव्यकाननशोभितम् ॥११०॥
सा विवेशाश्रमपदं वीरसेनसुतप्रिया ।
अभिवाद्य तपोवृद्धान् विनयावनता स्थिता ॥१११

पूजां चास्या यथान्यायं कृत्वा तत्र तपोधनाः ।
"आस्यतामि"त्यथोचुस्ते "ब्रूहि किं करवामहे ॥११२॥
दृष्ट्वैव ते परं रूपं द्युतिं च परमामिह ।
विस्मयो नः समुत्पन्नः ; समाश्वसिहि, मा शुचः ॥११३॥
अस्यारण्यस्य देवी त्वमुताहोऽस्य महीभृतः ।
अस्याश्च नद्याः कल्याणि ! वद सत्यमनिन्दिते ! ॥११४॥

दमयन्त्युवाच—
"विदर्भेषु महीपालो भीमो नाम महाद्युतिः ।
तस्य मां तनयां सर्वे जानीत द्विजसत्तमाः ॥११५॥
निषधाधिपतिर्धीमान् नलो नाम महायशाः
वीरः संग्रामजिद् विद्वान् मम भर्ता विशाम्पतिः ॥११६॥
स कैश्चिन्निकृतिप्रज्ञैरनार्यैरकृतात्मभिः ।
देवने कुशलैर्जिह्मैर्जितो राज्यं वसूनि च ॥११७॥
अन्वेषमाणा भर्तारं नलं रणविशारदम् ।
महात्मानं कृतास्त्रं च विचरामीह दुःखिता ॥११८॥
यदि कैश्चिदहोरात्रैर्न द्रक्ष्यामि नलं नृपम् ।
आत्मानं श्रेयसा योक्ष्ये देहस्यास्य विमोचनात्" ॥११९॥

तथा विलपतीमेकामरण्ये भीमनन्दिनीम् ।
दमयन्तीमथोचुस्ते तापसाः सत्यवादिनः ॥१२०॥
"उदर्कस्तव कल्याणि ! कल्याणो भविता शुभे !
वयं पश्याम तपसा क्षिप्रं द्रक्ष्यसि नैषधम्" ॥१२१॥

एवमुक्ता नलस्येष्टा महिषीं पार्थिवात्मजाम् ।
अन्तर्हितास्तापसास्ते साग्निहोत्राश्रमास्तथा ॥१२२॥
गत्वा प्रकृष्टमध्वानं दमयन्ती शुचिस्मिता ।
ददर्शाथ महासार्थं हस्त्यश्व-रथसङ्कुलम् ॥१२३॥

सा दृष्ट्वैव महासार्थं नलपत्नी यशस्विनी ।
उपसर्प्य वरारोहा जनमध्यं विवेश ह ।
उन्मत्तरूपा, शोकार्ता, तथा वस्त्रार्धसंवृता ।
कृशा, विवर्णा, मलिना, पांशुध्वस्त-शिरोरुहा ॥१२४-१२५॥
तां दृष्ट्वा तत्र मनुजाः केचिद् भीताः प्रदुद्रुवुः ।
केचिच्चिन्तां परां जग्मुः, केचित्तत्र विचुक्रुशुः ॥१२६॥

प्रहसन्ति स्म तां केचिदभ्यसूयन्ति चापरे ।
अकुर्वत दयां केचित् पप्रच्छुश्चापि भारत ! ॥१२७॥
"कासि ? कस्यासि कल्याणि ! किं वा मृगयसे वने ?
त्वां दृष्ट्वा व्यथिताः स्मेह, कच्चित् त्वमसि मानुषी ? ॥१२८॥
वद सत्यं, वनस्यास्य पर्वतस्याथ वा दिशः ।
देवता त्वं हि कल्याणि ! त्वां वयं शरणं गताः" ॥१२९॥

तथोक्ता तेन सार्थेन दमयन्ती नृपात्मजा ।
प्रत्युवाच ततः साध्वी भर्तृव्यसनपीडिता ॥१३०॥
"मानुषीं मां विजानीत मनुजाधिपतेः सुताम् ।
नृपस्नुषां राजभार्यां भर्तृदर्शन-लालसाम् ॥१३१॥
विदर्भराण्मम पिता, भर्ता राजा च नैषधः ।
नलो नाम महाभागस्तं मार्गाम्यपराजितम् ॥१३२॥

यदि जानीत नृपतिं क्षिप्रं शंसत मे प्रियम्
नलं पुरुषशार्दूलममित्रगणसूदनम् ” ॥१२३॥
तामुवाचानवद्याङ्गीं सार्थस्य महतः प्रभुः ।
“मनुष्यं नलनामानं न पश्यामि यशस्विनि !” ॥१२४॥
साब्रवीद् वणिजः सर्वान् सार्थवाहं च तं ततः ।
“क नु यास्यति सार्थोऽयमेतदाख्यातुमर्हसि ” ॥१२५॥

सार्थवाह उवाच—
“सार्थोऽयं चेदिराजस्य सुबाहोः सत्यदर्शिनः ।
क्षिप्रं जनपदं गन्ता लाभाय नृवरात्मजे !” ॥१२६॥
सा तच्छ्रुत्वानवद्याङ्गी सार्थवाह-वचस्तदा ।
जगाम सह तेनैव सार्थेन पतिलालसा ॥१२७॥

अथ काले बहुतिथे वने महति दारुणे ।
तडागं सर्वतोभद्रं पद्मसौगन्धिकं महत् ॥
ददृशुर्वणिजो रम्यं प्रभूत-यवसेन्धनम् ।
निर्मल-स्वादुसलिलं मनोहारि सुशीतलम् ॥१२८॥
सुपरिश्रान्तवाहास्ते निवेशाय मनो दधुः ।
उवास सार्थः सुमहान् वेलामासाद्य पश्चिमाम् ॥१२९॥

अथार्धरात्रसमये निःशब्दस्तिमिते तदा ।
सुप्ते सार्थे परिश्रान्ते हस्तियूथमुपागमत् ।
पानीयार्थं गिरिनदीं मदप्रस्रवणाविलम् ॥१४०॥
अथापश्यत सार्थं तं सार्थजान् सुबहून् गजान् ।

ते तान् ग्राम्यगजान् दृष्ट्वा सर्वे वनगजास्तदा ।
समाद्रवन्त वेगेन जिघांसन्तो मदोत्कटाः ॥१४१॥
तेषामापततां वेगः करिणां दुःसहोऽभवत् ।
नगाग्रादिव शीर्णानां शृङ्गाणां पततां क्षितौ ॥१४२॥
मार्गं संरुध्य संसुप्तं पद्मिन्याः सार्थमुत्तमम् ।
ते तं ममर्दुः सहसा चेष्टमानं महीतले ॥१४३॥
हाहाकारं प्रमुञ्चन्तः सार्थिकाः शरणार्थिनः ।
केचिद्दन्तैः, करैः केचित्, केचित् पद्भ्यां हता गजैः ॥१४४॥
एवम्प्रकारैर्बहुभिर्दैवेनाक्रम्य दन्तिभिः ।
राजन् ! विनिहतं सर्वं समृद्धं सार्थमण्डलम् ॥१४५॥
अशोचत् तत्र वैदर्भी, "किं नु मे दुष्कृतं कृतम् ।
या नाहमद्य मृदिता हस्तियूथेन दुःखिता ॥१४६॥
प्राप्तव्यं सुचिरं दुःखं मया नूनमसंशयम् ।
'नाप्राप्तकालो म्रियते' श्रुतं वृद्धानुशासनम् " ॥१४७॥
एवमादीनि दुःखानि सा विलप्य वराङ्गना ।
हतशिष्टैः सह तदा ब्राह्मणैर्वेदपारगैः ।
अगच्छद्राजशार्दूल ! चन्द्रलेखेव शारदी ॥१४८॥
गच्छन्ती सा चिराद् बाला पुरमासादयन्महत् ।
सायाह्ने चेदिराजस्य सुबाहोः सत्यदर्शिनः ।
वस्त्रार्धकर्तसंवीता प्रविवेश पुरोत्तमम् ॥१४९॥
तां विह्वलां, कृशां, दीनां, मुक्तकेशीमसंमृजाम् ।
उन्मत्तामिव गच्छन्तीं ददृशुः पुरवासिनः ॥१५०॥

प्रविशन्तीं तु तां दृष्ट्वा चेदिराजपुरीं तदा ।
अनुजग्मुस्तत्र बाला ग्रामिपुत्राः कुतूहलात् ॥१५१॥
सा तैः परिवृतागच्छत् समीपे राजवेश्मनः ।
तां प्रासाद-गतापश्यद्राजमाता जनैर्वृताम् ॥१५२॥
धात्रीमुवाच, "गच्छैनामानयेह ममान्तिकम् ।
जनेन क्लिश्यतेऽनाथा दुःखिता शरणार्थिनी ॥१५३॥
तादृग्रूपं च पश्यामि विद्योतयति मे गृहम् ।
उन्मत्तवेशमच्छन्ना श्रीरिवायतलोचना" ॥१५४॥
सा जनं वारयित्वा तं प्रासादतलमुत्तमम् ।
आरोप्य विस्मिता राजन् ! दमयन्तीमपृच्छत ॥१५५॥
"एवमप्यसुखाविष्टा बिभर्षि परमं वपुः ।
भासि विद्युदिवाभ्रेषु शंस मे कासि, कस्य वा ॥१५६॥
न हि ते मानुषं रूपं भूषणैरपि वर्जितम् ।
असहाया नरेभ्यश्च नोद्विजस्यमरप्रभे !" ॥१५७॥
तच्छ्रुत्वा वचनं तस्या भैमी वचनमब्रवीत् ।
"मानुषीं मां विजानीहि भर्तारं समनुव्रताम् ॥१५८॥
सैरिन्ध्रीं जातिसम्पन्नां भुजिष्यां कामवासिनीम् ।
फलमूलाशनामेकां यत्रसायम्प्रतिश्रयाम् ॥१५९॥
असंख्येयगुणो भर्ता मां च नित्यमनुव्रतः ।
भक्ताहमपि तं वीरं छायेवानपगामिनी ॥१६०॥
तस्य दैवात् प्रसङ्गोऽभूदतिमात्रं सुदेवने ।
द्यूते स निर्जितश्चैव वनमेक उपेयिवान् ॥१६१॥

तमेकवसनं वीरमुन्मत्तमिव विह्वलम् ।
आश्वासयन्ती भर्तारमहमन्वगमं वनम् ॥१६२॥
ततो बहुतिथे काले सुप्तामुत्सृज्य मां क्वचित् ।
वाससोऽर्धं परिच्छिद्य त्यक्तवान् माममागसम्" ॥१६३॥

तामश्रु-परिपूर्णाक्षीं विलपन्तीं तथा बहु ।
राजमाताब्रवीदार्ता भैमीमार्तस्वरां स्वयम् ॥१६४॥
"वस त्वं मयि कल्याणि ! प्रीतिर्मे परमा त्वयि ।
मृगयिष्यन्ति ते भद्रे ! भर्तारं पुरुषा मम" ॥१६५॥
सा तत्र पूज्यमाना वै दमयन्ती व्यनन्दत ।
सर्वकामैः सुविहितैर्निरुद्वेगावसत् तदा ॥१६६॥

उत्सृज्य दमयन्तीं तु नलो राजा विशाम्पते !
ददर्श दावं दह्यन्तं महान्तं गहने वने ॥१६७॥
तत्र शुश्राव शब्दं वै मध्ये भूतस्य कस्यचित् ।
"अभिधाव नले"त्युच्चैः "पुण्यश्लोके"ति चासकृत् ॥१६८॥
"मा भै"रिति नलश्चोक्त्वा मध्यमग्नेः प्रविश्य तम् ।
ददर्श नागराजानं शयानं कुण्डलीकृतम् ॥१६९॥

स नागः प्राञ्जलिर्भूत्वा वेपमानो नलं तदा ।
उवाच, "विद्धि मां नागं कर्कोटकं नृप !
उपदेक्ष्यामि ते श्रेयस्त्वमनुसर्तेति मां व्रजाम्" ॥१७०॥

स उक्त्वा नलं दष्ट्वाऽकरोद् दाव विवर्णितम् ।
अदृश्यरूपश्च स नागः पुनः कर्कोटकोऽभवत् ॥१७१॥

'पदानि गणयन् गच्छ स्वानि नैषध ! कानिचित् ।
तत्र तेऽहं महाबाहो ! श्रेयो धास्यामि यत्परम्' ॥१७२॥
ततः संख्यातुमारब्धमदशद्दशमे पदे ।
तस्य दष्टस्य तद्रूपं क्षिप्रमन्तरधीयत ॥१७३॥
ततः कर्कोटको नागः सान्त्वयन्नलमब्रवीत् ।
"मया तेऽन्तर्हितं रूपं न त्वा विद्युर्जना इति ॥१७४॥
यत्कृते चासि निकृतो दुःखेन महता नल !
विषेण स मदीयेन त्वयि दुःखं निवत्स्यति ॥१७५॥
गच्छ राजन्नितः 'सूतो बाहुकोऽह'मिति ब्रुवन् ।
समीपमृतुपर्णस्य स हि चैवाक्षनैपुणः ॥१७६॥
स तेऽक्षहृदयं दाता राजाश्वहृदयेन वै ।
भविष्यसि यदा [illegible] श्रेयसा योक्ष्यसे तदा ॥१७७॥
अनेन वाससाच्छन्नः स्वं रूपं प्रतिपत्स्यसे ।"
इत्युक्त्वा प्रददौ तस्मै दिव्यं वासोयुगं तदा ॥१७८॥
तस्मिन्नन्तर्हिते नागे प्रययौ नैषधो नलः ।
ऋतुपर्णस्य नगरं प्राविशद्दशमेऽहनि ॥१७९॥
हृतराज्ये नले भीमः सभार्ये प्रेष्यतां गते ।
द्विजान् प्रस्थापयामास नलदर्शनकाङ्क्षया ॥१८०॥
ततश्चेदिपुरीं रम्यां सुदेवो नाम वै द्विजः ।
विचिन्वानोऽथ वैदर्भीमपश्यद्राजवेश्मनि ॥१८१॥
तां [illegible] मलिनां कृशाम् ।
[illegible] वाक्यमब्रवीत् ॥१८२॥

उपगम्य ततो भैमीं सुदेवो ब्राह्मणोऽब्रवीत् ।
"अहं सुदेवो वैदर्भि ! भ्रातुस्ते दयितः सखा ॥१८३॥
भीमस्य वचनाद्राजंस्त्वामन्वेष्टुमिहागतः ।
त्वत्कृते बन्धुवर्गाश्च गतसत्त्वा इवासते" ॥१८४॥

अथ चेदिपतेर्माता राजयान्तःपुरात् तदा ।
जगाम यत्र सा बाला ब्राह्मणेन समागता ॥१८५॥
ततः सुदेवमानाय्य राजमाता विशाम्पते !
पप्रच्छ, 'भार्या कस्येयं, सुता वा कस्य भामिनी ?' ॥१८६॥

सुदेव उवाच—
"विदर्भराजो धर्मात्मा भीमो नाम महाद्युतिः ।
सुतेयं तस्य कल्याणी दमयन्तीति विश्रुता ॥१८७॥
राजा तु नैषधो नाम वीरसेनसुतो नलः ।
भार्येयं तस्य कल्याणी पुण्यश्लोकस्य धीमतः ॥१८८॥
स द्यूतेन जितो भ्रात्रा हृतराज्यो महीपतिः ।
दमयन्त्या गतः सार्धं न प्राज्ञायत कस्यचित्" ॥१८९॥

उत्सृज्य बाष्पं गनके राजमातेदमब्रवीत् ।
"भगिन्या दुहिता मेऽसि पिशुनानेन सूचिता ॥१९०॥
यथैव ते पितुर्गेहं तथैव मम भाविनि !
यथैव च ममैश्वर्यं दमयन्ति ! तथा तव" ॥१९१॥

तां प्रहृष्टेन मनसा दमयन्ती विशाम्पते !
प्रणम्य मातुर्भगिनीमिदं वचनमब्रवीत् ॥१९२॥

"पप्रायमानापि सती सुखमभ्युषिता त्वयि ।
चिरविप्रोषितां मातर्मामनुज्ञातुमर्हसि ॥१९३॥
दारकौ च हि मे नीतौ वसतस्तत्र बालकौ ।
पित्रा विहीनौ शोकार्तौ मया चैव कथं नु तौ" ॥१९४॥
प्रास्थापयद्राजमाता यानेन नरवाहिना ।
गुप्तां बलेन महता पुत्रस्यानुमते ततः ॥१९५॥
ततः सा नचिरादेव विदर्भानगमत् पुनः ।
तां तु बन्धुजनः सर्वः प्रहृष्टः समपूजयत् ॥१९६॥

सा व्युष्टा रजनीं, तत्र पितुर्वेश्मनि भामिनी ।
विश्रान्ता मातरं राजन्निदं वचनमब्रवीत् ॥१९७॥
"मां चेदिच्छसि जीवन्तीं मातः ! सत्यं ब्रवीमि ते ।
नरवीरस्य वै तस्य नलस्यानयने यत" ॥१९८॥
ततो भीमं महाराजं भार्या वचनमब्रवीत् ।
"दमयन्ती तव सुता भर्तारमनुशोचति ।
प्रयतन्तु तव प्रेष्याः पुण्यश्लोकस्य मार्गणे" ॥१९९॥

तथा प्रचोदितो राज्ञा ब्राह्मणान् वशवर्तिनः ।
प्रास्थापयद्दिशः सर्वा "यतध्वं नलदर्शने" ॥२००॥
अथ तानब्रवीद् भैमी "सर्वराष्ट्रेष्विदं वचः ।
ब्रुवध्वं जनसंसत्सु तत्र तत्र पुनः पुनः ॥२०१॥
'क्व नु त्वं कितव ! छित्त्वा वस्त्रार्धं प्रस्थितो मम ।
उत्सृज्य विपिने सुप्तामनुरक्तां प्रियां प्रिय ! ॥२०२॥

तस्या रुदन्त्याः सततं तेन शोकेन पार्थिव ।
प्रसादं कुरु वै वीर ! प्रतिवाक्यं वदस्व च' ॥२०३॥
एवं ब्रुवाणान् यदि वः प्रतिब्रूयाद्धि कश्चन ।
स नरः सर्वथा ज्ञेयः कश्चासौ क्व नु वर्तते ॥२०४॥
यश्च वो वचनं श्रुत्वा ब्रूयात् प्रतिवचो नरः ।
तदादाय वचस्तस्य ममावेद्यं द्विजोत्तमाः ।" ॥२०५॥

अथ दीर्घस्य कालस्य पर्णादो नाम वै द्विजः ।
प्रत्येत्य नगरं भैमीमिदं वचनमब्रवीत् ॥२०६॥
"नैषधं मृगयाणेन दमयन्ति ! मया नलम् ।
अयोध्यां नगरीं गत्वा भाङ्गासुरिरुपस्थितः ॥२०७॥
श्रावितश्च मया वाक्यं त्वदीयं स महाजने ।
ऋतुपर्णो महाभागो यथोक्तं वरवर्णिनि !॥२०८॥
तच्छ्रुत्वा नाब्रवीत् किञ्चिदृतुपर्णो नराधिपः ।
न च पारिषदः कश्चिद् भाष्यमाणो मयासकृत् ॥२०९॥
अनुज्ञातं तु मां राज्ञा विजने कश्चिदब्रवीत् ।
ऋतुपर्णस्य पुरुषो बाहुको नाम नामतः ॥
सूतस्तस्य नरेन्द्रस्य विरूपो ह्रस्वबाहुकः ।
शीघ्रयाने सुकुशलो मिष्टकर्ता च भोजने ॥२१०॥
स विनिःश्वस्य बहुशो रुदित्वा च पुनः पुनः ।
कुशलं चैव मां पृष्ट्वा पश्चादिदमभाषत ॥२११॥
'वैषम्यमपि सम्प्राप्ता गोपायन्ति कुलस्त्रियः ।
वञ्चिता भर्तृभिश्चैव न कुप्यन्ति कदाचन ।
प्राणांश्चारित्र-कवचान् धारयन्ति कुलस्त्रियः ॥२१२॥

विषमस्थेन मूढेन परिभ्रष्टसुखेन तु ।
यत् सा तेन परित्यक्ता तत्र न क्रोद्धुमर्हति ॥२१३॥
प्राणयात्रां परिप्रेप्सोः शकुनैर्हृतवाससः ।
आधिभिर्दह्यमानस्य न श्यामा क्रोद्धुमर्हति' ॥२१४॥
तस्य तद् वचनं श्रुत्वा त्वरितोऽहमिहागतः ।
श्रुत्वा प्रमाणं भवती, राज्ञश्चैव निवेदय" ॥२१५॥

एतच्छ्रुत्वाश्रुपूर्णाक्षी पर्णादस्य विशाम्पते ।
दमयन्ती रहोऽभ्येत्य मातरं प्रत्यभाषत ॥२१६॥
"अयमर्थो न संवेद्यो भीमे मातः ! कदाचन ।
त्वत्सन्निधौ नियोक्ष्येऽहं सुदेवं द्विजसत्तमम्" ॥२१७॥

ततः सुदेवमाभाष्य दमयन्ती युधिष्ठिर ।
अब्रवीत् सविधौ मातुर्दुःखशोक-समन्विता ॥२१८॥
"गत्वा सुदेव ! नगरीमयोध्यावासिनं नृपम् ।
ऋतुपर्णं वचो ब्रूहि सम्पतन्निव कामगः ॥
'आस्थास्यति पुनर्भैमी दमयन्ती स्वयंवरम् ।
यथा च गणितः कालः श्वोभूते स भविष्यति' " ॥२१९॥

एवं तया यथोक्तो वै गत्वा राजानमब्रवीत् ।
ऋतुपर्णं महाराज ! सुदेवो ब्राह्मणस्तदा ॥२२०॥
श्रुत्वा वचः सुदेवस्य ऋतुपर्णो नराधिपः ।
सान्त्वयन् श्लक्ष्णया वाचा बाहुकं प्रत्यभाषत ॥२२१॥
"विदर्भान् यातुमिच्छामि दमयन्त्याः स्वयंवरम् ।
एकाह्ना हयतत्त्वज्ञ ! मन्यसे यदि बाहुक !" ॥२२२॥

एवमुक्तस्य कौन्तेय ! तेन राज्ञा नलस्य ह ।
व्यदीर्यत मनो दुःखात्, प्रदध्यौ स महामनाः ॥२२३॥
"दमयन्ती वदेदेतत् कुर्याद् दुःखेन मोहिता ।
अस्मदर्थे भवेद्वायमुपायश्चिन्तितो महान् ॥२२४॥
नृशंसं बत वैदर्भी कर्तुकामा तपस्विनी ।
मया क्षुद्रेण निकृता कृपणा पापबुद्धिना ॥२२५॥
मम शोकेन संविग्ना नैराश्यात् तनुमध्यमा ।
नैवं सा कर्हिचित् कुर्यात् सापत्या च विशेषतः ॥२२६॥
यदत्र सत्यं वासत्यं गत्वा वेत्स्यामि निश्चयम् ।
ऋतुपर्णस्य वै कामामात्मार्थं च करोम्यहम्" ॥२२७॥
इति निश्चित्य मनसा बाहुको दीनमानसः ।
कृताञ्जलिरुवाचेदमृतुपर्णं नराधिपम् ॥२२८॥
"प्रतिजानामि ते वाक्यं गमिष्यामि नराधिप ।
एकाह्ना पुरुषव्याघ्र ! विदर्भनगरीं नृप !" ॥२२९॥
ततः सदश्वांश्चतुरः कुलशीलसमन्वितान् ।
योजयामास कुशलो जवयुक्तान् रथे नलः ॥२३०॥
ततो युक्तं रथं राजा समारोहत् त्वरान्वितः ।
ते पीड्यमाना विधिवद् बाहुकेन हयोत्तमाः ।
समुत्पेतुरथाकाशं रथिनं मोहयन्ति च ॥२३१॥
ततो विदर्भान् सम्प्राप्तं सायाह्ने सत्यविक्रमम् ।
ऋतुपर्णं जना राज्ञे भीमाय प्रत्यवेदयन् ॥२३२॥
स भीमः प्रतिजग्राह पूजया परया न

"किं कार्यं ? स्वागतं तेऽस्तु" राज्ञा पृष्टश्च भारत ।
नाभिजज्ञे स नृपतिर्दुहित्रर्थं समागतम् ॥२३३॥
ऋतुपर्णोऽपि राजा स धीमान् सत्यपराक्रमः ।
राजानं राजपुत्रं वा न स्म पश्यति कञ्चन ।
नैव स्वयंवरकथां, न च विप्र-समागमम् ॥२३४॥
ततो विगणयन् राजा मनसा कोशलाधिपः ।
"आगतोऽस्मी"त्युवाचैनं "भवन्तमभिवादकः" ॥२३५॥
दमयन्ती तु शोकार्त्ता दृष्ट्वा भाङ्गासुरिं नृपम् ।
सूतपुत्रं च वार्ष्णेयं बाहुकं च तथाविधम् ।
दूतीं प्रस्थापयामास नैषधान्वेषणे शुभाम् ॥२३६॥

ततः समाहिता गत्वा दूती बाहुकमब्रवीत् ।
दमयन्त्यपि कल्याणी प्रासादस्था ह्युपैक्षत ॥२३७॥

केशिन्युवाच—

"स्वागतं ते मनुजेन्द्र ! कुशलं ते ब्रवीम्यहम् ।
कदा वै प्रस्थिता यूयं किमर्थमिह चागताः ?" ॥२३८॥

बाहुक उवाच—

"श्रुतः स्वयंवरो राज्ञा कौशलेन महात्मना ।
द्वितीयो दमयन्त्या वै भविता श्व इति द्विजात् ॥२३९॥
श्रुत्वैतत् प्रस्थितो राजा शत-योजनयायिभिः ।
हयैर्वातजवैर्मुख्यैरहमस्य च सारथिः" ॥२४०॥

सर्वं विकारं दृष्ट्वा तु पुण्यश्लोकस्य धीमतः ।
आगत्य केशिनी क्षिप्रं दमयन्त्यै न्यवेदयत् ॥२४१॥
दमयन्ती ततो भूयः प्रेषयामास केशिनीम् ।
मातुः सकाशं दुःखार्ता नलदर्शनकाङ्क्षया ॥२४२॥
"परीक्षितो मे बहुशो बाहुको नलशङ्कया ।
रूपे मे संशयस्त्वेकः स्वयमिच्छामि वेदितुम् ।
स वा प्रवेश्यतां मातर्मां वानुज्ञातुमर्हसि" ॥२४३॥
सा वै पित्राभ्यनुज्ञाता मात्रा च भरतर्षभ ।
नलं प्रवेशयामास यत्र तस्याः प्रतिश्रयः ॥२४४॥

ततः काषायवसना जटिला मलपङ्किनी ।
दमयन्ती महाराज ! बाहुकं वाक्यमब्रवीत् ॥२४५॥
"पूर्वं दृष्टस्त्वया कश्चिद्धर्मज्ञो नाम बाहुक !
सुप्तामुत्सृज्य विपिने गतो यः पुरुषः स्त्रियम् ? ॥२४६॥
किमु तस्य मया बाल्यादपराद्धं महीपतेः ।
यो मामुत्सृज्य विपिने गतवान् निद्रयार्दिताम् ?" ॥२४७॥

नल उवाच—

"मम राज्यं प्रनष्टं यन्नाहं तत् कृतवान् स्वयम् ।
कलिना तत् कृतं भीरु ! यच्च त्वामहमत्यजम् ॥२४८॥
तच्छापदग्धः सततं सोऽन्तर्वह्निरिवाहितः ।
विमुच्य मां गतः पापस्ततोऽहमिह चागतः ॥२४९॥

कथं तु नारी भर्तारमनुरक्तमनुव्रतम् ।
उत्सृज्य वरयेदन्यं यथा त्वं भीरु ! कर्हिचित् ? ॥२५०॥
दूताश्चरन्ति पृथिवीं कृत्स्नां नृपतिशासनात् ।
भैमी किल स्वभर्तारं द्वितीयं वरयिष्यति" ॥२५१॥

दमयन्ती तु तच्छ्रुत्वा नलस्य परिदेवितम् ।
प्राञ्जलिर्वेपमाना च भीता वचनमब्रवीत् ॥२५२॥
"न मामर्हसि कल्याण ! दोषेण परिशङ्कितुम् ।
तवाभिगमनार्थं तु सर्वतो ब्राह्मणा गताः ।
वाक्यानि मम गाथाभिर्गीयमाना दिशो दश ॥२५३॥
ततस्त्वां ब्राह्मणो विद्वान् पर्णादो नाम पार्थिव !
अभ्यगच्छत् कोशलायामृतुपर्ण-निवेशने ॥२५४॥
तेन वाक्ये कृते सम्यक् प्रतिवाक्ये तथाहृते ।
उपायोऽयं मया दृष्टो नैषधानयने तव ॥२५५॥
त्वामृते न हि लोकेऽन्य एकाह्ना पृथिवीपते !
समर्थो योजनशतं गन्तुमश्वैर्नराधिप ! ॥२५६॥
स्पृशेयं तेन सत्येन पादावेतौ महीपते !
यथा नासत्कृतं किञ्चिन्मनसापि चराम्यहम् ॥२५७॥
अयं चरति लोकेऽस्मिन् भूतसाक्षी सदागतिः ।
एष मे मुञ्चतु प्राणान् यदि पापं चराम्यहम् ॥२५८॥
एते देवास्त्रयः कृत्स्नं त्रैलोक्यं धारयन्ति वै ।
विमुञ्चन्तु यथासत्यमेतद्वाद्य त्यजन्तु माम्" ॥२५९॥

एवमुक्ते ततो वायुरन्तरिक्षादभाषत ।
"नैषा कृतवती पापं नल ! सत्यं ब्रवीमि ते ॥२६०॥
साक्षिणो रक्षिणश्चास्या वयं त्रीन् परिवत्सरान् ।
उपायो विहितश्चायं त्वदर्थमतुलोऽनया" ॥२६१॥
तथा ब्रुवति वायौ तु पुष्पवृष्टिः पपात ह ।
देव-दुन्दुभयो नेदुर्ववौ च पवनः शिवः ॥२६२॥
तदद्भुततमं दृष्ट्वा नलो राजाथ भारत ।
दमयन्त्यां विशङ्कां तां व्यपाकर्षदरिन्दमः ॥२६३॥

ततस्तद्वस्त्रमजरं प्रावृणोद् वसुधाधिपः ।
संस्मृत्य नागराजं तं ततो लेभे स्वकं वपुः ॥२६४॥
स्वरूपिणं तु भर्तारं दृष्ट्वा भीमसुता तदा ।
प्राक्रोशदुच्चैरालिङ्ग्य पुण्यश्लोकमनिन्दिता ॥२६५॥
भैमीमपि नलो राजा भ्राजमानो यथा पुरा ।
सस्वजे स्वसुतौ चापि यथावदभ्यनन्दत ॥२६६॥
स चतुर्थे ततो वर्षे सङ्गम्य सह भार्यया ।
सर्वकामैः सुसिद्धार्थो लब्धवान् परमां मुदम् ॥२६७॥
दमयन्त्यपि भर्तारमासाद्याप्यायिता भृशम् ।
अर्धसञ्जातसस्येव तोयं प्राप्य वसुन्धरा ॥२६८॥

सावित्र्युपाख्यानम्[1]

आसीन्मद्रेषु धर्मात्मा राजा परमधार्मिकः ।
पार्थिवोऽश्वपतिर्नाम सर्वभूतहिते रतः ।
क्षमावाननपत्यश्च सत्यवाग् विजितेन्द्रियः ।
अतिक्रान्तेन वयसा सन्तापमुपजग्मिवान् ॥१-२॥
अपत्योत्पादनार्थं तीव्रं नियममास्थितः ।
काले नियमिताहारो ब्रह्मचारी जितेन्द्रियः ।
हुत्वा शतसहस्रं स सावित्र्या राजसत्तमः ।
षष्ठे षष्ठे तदा काले बभूव मितभोजनः ॥३-४॥
पूर्णे त्वष्टादशे वर्षे सावित्री तुष्टिमभ्यगात् ।
रूपिणी च तदा राजन् ! दर्शयामास तं नृपम् ।
उवाच चैनं वरदा वचनं पार्थिवं तदा ॥५॥
"वरं वृणीष्वाश्वपते ! मद्रराज ! यदीप्सितम् ।
न प्रमादश्च धर्मेषु कर्त्तव्यस्ते कथञ्चन" ॥६॥

अश्वपतिरुवाच—

"अपत्यार्थः समारम्भः कृतो धर्मेप्सया मया ।
पुत्रा मे बहवो देवि ! भवेयुः कुलभावनाः" ॥७॥

सावित्र्युवाच—

"पूर्वमेव मया राजन्नभिप्रायमिमं तव ।
ज्ञात्वा पुत्रार्थमुक्तो वै भगवांस्ते पितामहः ।
कन्या तेजस्विनी सौम्य ! क्षिप्रमेव भविष्यति ॥८॥

---

[1] वनपर्व्व—२९३ अध्यायः ।

एतावच्च न ते किञ्चिद् व्याहर्त्तव्यं कथञ्चन ।
पितामह-नियोगेन तुष्टा ह्येतद् ब्रवीमि ते" ॥८॥

अन्तर्हितायां सावित्र्यां जगाम स्वपुरं नृपः ।
स्वराज्ये चावसद् वीरः प्रजा धर्मेण पालयन् ॥१०॥
कस्मिंश्चित् तु गते काले ज्येष्ठा वै धर्मचारिणी ।
महिषी सुषुवे तस्य कन्यां राजीवलोचनाम् ॥११॥
सावित्र्या प्रीतया दत्ता, सावित्र्या हुतया ह्यपि ।
"सावित्री"त्येव नामास्याश्चक्रुर्विप्रास्तथा पिता ॥१२॥

सा विग्रहवतीव श्रीर्व्यवर्द्धत नृपात्मजा ।
कालेन चापि सा कन्या यौवनस्था बभूव ह ॥१३॥
तां तु पद्मपलाशाक्षीं ज्वलन्तीमिव तेजसा ।
न कश्चिद् वरयामास तेजसा प्रतिवारितः ॥१४॥
यौवनस्थां तु तां दृष्ट्वा स्वां सुतां देवरूपिणीम् ।
अयाच्यमानाञ्च वरैर्नृपतिर्दुःखितोऽभवत् ॥१५॥

राजोवाच—

"पुत्रि ! प्रदानकालस्ते, न च कश्चिद् वृणोति माम् ।
स्वयमन्विच्छ भर्त्तारं गुणैः सदृशमात्मनः ॥१६॥
प्रार्थितः पुरुषो यश्च स निवेद्यस्त्वया मम ।
विमृश्याहं प्रदास्यामि वरय त्वं यथेप्सितम्" ॥१७॥

साभिवाद्य पितुः पादौ व्रीडितेव तपस्विनी ।
पितुर्वचनमाज्ञाय निर्जगामाविचारितम् ॥१८॥

सा हैमं रथमास्थाय स्थविरैः सचिवैर्वृता ।
तपोवनानि रम्याणि राजर्षीणां जगाम ह ॥१८॥
एवं तीर्थेषु सर्वेषु धनोत्सर्गं नृपात्मजा ।
कुर्वती द्विजमुख्यानां तं तं देशं जगाम ह ॥२०॥
अथ मद्राधिपो राजा नारदेन समागतः ।
उपविष्टः सभामध्ये कथायोगेन भारत ॥२१॥
ततोऽभिगम्य तीर्थानि सर्वाण्येवाश्रमांस्तथा ।
आजगाम पितुर्वेश्म सावित्री सह मन्त्रिभिः ॥२२॥

नारदेन सहासीनं सा दृष्ट्वा पितरं शुभा ।
उभयोरेव शिरसा चक्रे पादाभिवन्दनम् ॥२३॥
सा "ब्रूहि विस्तरेणे"ति पित्रा समोदिता शुभा ।
तदेव तस्य वचनं प्रतिगृह्येदमब्रवीत् ॥२४॥

सावित्र्युवाच—

"आसीच्छाल्वेषु धर्मात्मा क्षत्रियः पृथिवीपतिः ।
द्युमत्सेन इति ख्यातः पश्चादन्धो बभूव ह ॥२५॥
विनष्टचक्षुषस्तस्य बालपुत्रस्य धीमतः ।
सामीप्येन हृतं राज्यं छिद्रेऽस्मिन् पूर्ववैरिणा ॥२६॥
स बालवत्सया सार्धं भार्यया प्रस्थितो वनम् ।
महारण्यं गतश्चापि तपस्तेपे महाव्रतः ॥२७॥
तस्य पुत्रः पुरे जातः संवृद्धश्च तपोवने ।
सत्यवाननुरूपो मे भर्तेति मनसा वृतः" ॥२८॥

नारद उवाच—

"अहो बत महत् पापं सावित्र्या नृपते ।   कृतम् ।
अजानन्त्या यदनया गुणवान् सत्यवान् वृतः ॥२८॥
सत्यं वदत्यस्य पिता, सत्यं माता प्रभाषते ।
तथास्य ब्राह्मणाश्चक्रुर्नामैतत् सत्यवानिति ॥३०॥
विवस्वानिव तेजस्वी बृहस्पतिसमो मतौ ।
महेन्द्र इव वीरश्च वसुधेव क्षमान्वितः ॥३१॥
ययातिरिव चोदारः सोमवत् प्रियदर्शनः ।
ब्रह्मण्यः सत्यवादी च शिबिरौशीनरो यथा ॥३२॥
एको दोषोऽस्ति नान्योऽस्य, सोऽद्यप्रभृति सत्यवान् ।
संवत्सरेण क्षीणायुर्देहन्यासं करिष्यति" ॥३३॥

राजोवाच—

"एहि सावित्रि ! गच्छस्व, अन्यं वरय शोभने !
तस्य दोषो महानेको गुणानाक्रम्य च स्थितः" ॥३४॥

सावित्र्युवाच—

"सकृदंशो निपतति, सकृत् कन्या प्रदीयते ।
सकृदाह 'ददानी'ति, त्रीण्येतानि सकृत् सकृत् ॥३५॥
दीर्घायुरथवाल्पायुः सगुणो निर्गुणोऽपि वा ।
सकृद् वृतो मया भर्ता न द्वितीयं वृणोम्यहम् ॥३६॥
मनसा निश्चयं कृत्वा ततो वाचाभिधीयते ।
क्रियते कर्मणा पश्चात्, प्रमाणं मे मनस्ततः" ॥३७॥

नारद उवाच—

"स्थिरा बुद्धिर्नरश्रेष्ठ ! सावित्र्या दुहितुस्तव ।
नैषा वारयितुं शक्या धर्मादस्मात् कथञ्चन ॥३८॥
नान्यस्मिन् पुरुषे सन्ति ये सत्यवति वै गुणाः ।
प्रदानमेव तस्मान्मे रोचते दुहितुस्तव" ॥३९॥

राजोवाच—

"अविचाल्यमेतदुक्तं तथ्यञ्च भवता वचः ।
करिष्याम्येतदेवं च गुरुर्हि भगवान् मम" ॥४०॥

नारद उवाच—

"अविघ्नमस्तु सावित्र्याः प्रदाने दुहितुस्तव ।
साधयिष्याम्यहं तावत् सर्व्वेषां भद्रमस्तु वः" ॥४१॥

ततो वृद्धान् द्विजान् सर्व्वान् ऋत्विजः सपुरोहितान् ।
समाहूय दिने पुण्ये प्रययौ सह कन्यया ॥४२॥
मेध्यारण्यं स गत्वा च द्युमत्सेनाश्रमं नृपः ।
पद्भ्यामेव द्विजैः सार्द्धं राजर्षिं तमुपागमत् ॥४३॥
स राजा तस्य राजर्षेः कृत्वा पूजां यथार्हतः ।
वाचा सुनियतो भूत्वा चकारात्मनिवेदनम् ॥४४॥
तस्यार्घ्यमासनं चैव समावेद्य स धर्मवित् ।
"किमागमनमि"त्येवं राजा राजानमब्रवीत् ॥४५॥

अश्वपतिरुवाच—

"सावित्री नाम राजर्षे ! कन्येयं मम शोभना ।
तां स्वधर्मेण धर्मज्ञ ! स्नुषार्थं त्वं गृहाण मे" ॥४६॥

द्युमत्सेन उवाच—

"च्युताः स्म राज्याद् वनवासमाश्रिता-
श्चराम धर्मं नियतास्तपस्विनः ।
कथं त्वनर्हा वनवासमाश्रमे
निवत्स्यते क्लेशमिमं सुता तव ?" ॥४७॥

अश्वपतिरुवाच—

"आशां नार्हसि मे हन्तुं सौहृदात् प्रणतस्य च ।
अभितश्चागतं प्रेम्णा प्रत्याख्यातुं न मार्हसि" ॥४८॥

द्युमत्सेन उवाच—

"पूर्वमेवाभिलषितः सम्बन्धो मे त्वया सह ।
भ्रष्टराज्यस्त्वहमिति तत एतद् विचारितम् ॥४९॥
अभिप्रायस्त्वयं यो मे पूर्वमेवाभिकाङ्क्षितः ।
स निर्वर्ततु मेऽद्यैव काङ्क्षितो ह्यसि मेऽतिथिः" ॥५०॥

ततः सर्वान् समानाय्य द्विजानाश्रमवासिनः ।
यथाविधि समुद्वाहं कारयामासतुर्नृपौ ॥५१॥
दत्त्वा सोऽश्वपतिः कन्यां यथार्हं सपरिच्छदम् ।
ययौ स्वमेव भवनं युक्तः परमया मुदा ॥५२॥
सत्यवानपि तां भार्यां लब्ध्वा सर्वगुणान्विताम् ।
मुमुदे सा च तं लब्ध्वा भर्तारं मनसेप्सितम् ॥५३॥

गते पितरि सर्वाणि संन्यस्याभरणानि सा ।
जगृहे वल्कलान्येव वस्त्रं काषायमेव च ॥५४॥

परिचारैर्गुणैश्चापि प्रश्रयेण दमेन च ।
सर्वकामक्रियाभिश्च सर्वेषां तुष्टिमावहत् ॥५५॥
एवं तत्राश्रमे तेषां तदा निवसतां सताम् ।
कालस्तपस्यतां कश्चिदत्यक्रामत भारत ॥५६॥
सावित्र्यास्तु शयानायास्तिष्ठन्त्यास्तु दिवानिशम् ।
नारदेन यदुक्तं तद् वाक्यं मनसि वर्त्तते ॥५७॥
ततः काले बहुतिथे व्यतिक्रान्ते कदाचन ।
प्राप्तः स कालो मर्त्तव्यं यत्र सत्यवता नृप ! ॥५८॥
गणयन्त्याश्च सावित्र्या दिवसे दिवसे गते ।
यद् वाक्यं नारदेनोक्तं वर्त्तते हृदि नित्यशः ॥५९॥
चतुर्थेऽहनि मर्त्तव्यमिति संचिन्त्य भामिनी ।
व्रतं त्रिरात्रमुद्दिश्य दिवारात्रं स्थिताभवत् ॥६०॥
श्वोभूते भर्त्तृमरणे सावित्र्या भरतर्षभ !
दुःखान्वितायास्तिष्ठन्त्याः सा रात्रिर्व्यत्यवर्त्तत ॥६१॥
अद्य तद्दिवसं चेति हुत्वा दीप्तं हुताशनम् ।
युगमात्रोदिते सूर्य्ये कृत्वा पौर्वाह्णिकीः क्रियाः ॥६२॥
ततः सर्वान् द्विजान् वृद्धान् श्वश्रूं श्वशुरमेव च ।
अभिवाद्यानुपूर्व्येण प्राञ्जलिर्नियता स्थिता ॥६२॥
अवैधव्याशिषस्ते तु सावित्र्यर्थे हिताः शुभाः ।
ऊचुस्तपस्विनः सर्वे तपोवन-निवासिनः ॥६४॥
"एवमस्त्वि"ति सावित्री ध्यानयोगपरायणा ।
मनसा ता गिरः सर्वाः प्रत्यगृह्णात् तपस्विनाम् ।

तं कालं तं मुहूर्तं च प्रतीक्षन्ती नृपात्मजा ।
यथोक्तं नारदवचश्चिन्तयन्ती सुदुःखिता ॥६५-६६॥

ततस्तु श्वश्रू श्वशुरावूचतुस्तां नृपात्मजाम् ।
एकान्तमास्थितां वाक्यं प्रीत्या भरतसत्तम ! ॥६७॥

श्वशुरावूचतुः—
"व्रतं यथोपदिष्टं तु तथा तत् पारितं त्वया ।
आहारकालः सम्प्राप्तः क्रियतां तदनन्तरम्" ॥६८॥

सावित्र्युवाच—
"अस्तं गते मयादित्ये भोक्तव्यं कृतकामया ।
एष मे हृदि सङ्कल्पः समयश्च कृतो मया" ॥६९॥

एवं सम्भाषमाणायाः सावित्र्या भोजनं प्रति ।
स्कन्धे परशुमादाय सत्यवान् प्रस्थितो वनम् ॥७०॥
सावित्री त्वाह भर्त्तारं, "नैकस्त्वं गन्तुमर्हसि ।
सह त्वया गमिष्यामि, न हि त्वां हातुमुत्सहे" ॥७१॥

सत्यवानुवाच—
"वनं न गतपूर्वं ते दुःखः पन्थाश्च भाविनि !
व्रतोपवासक्षामा च कथं पद्भ्यां गमिष्यसि ?" ॥७२॥

सावित्र्युवाच—
"उपवासान्न मे ग्लानिर्नास्ति चापि परिश्रमः ।
गमने च कृतोत्साहां प्रतिषेद्धुं न मार्हसि" ॥७३॥

श्वशुरम्पृष्टवान्[illegible]...

"यदि मे [illegible] [illegible] विभो ।
अद्य [illegible] [illegible]" ॥७४॥

[illegible] [illegible] च [illegible] ।
"वनं गच्छति मे भर्ता [illegible] [illegible] ॥७५॥
[illegible] सह [illegible] ।
[illegible] [illegible] [illegible]" ॥७६॥
[illegible] या भर्तारं [illegible] ।
[illegible] [illegible] हृदयेन विदूयता ॥७७॥

सा वनानि विचित्राणि रमणीयानि सर्वशः ।
मयूरगण-जुष्टानि ददर्श विपुलेक्षणा ॥७८॥
नदीः पुण्यवहाश्चैव पुष्पितांश्च नगोत्तमान् ।
सत्यवानाह "पश्ये"ति सावित्रीं मधुरं वचः ॥७९॥
निरीक्षमाणा भर्तारं सर्वावस्थमनिन्दिता ।
मृतमेव हि तं मेने काले मुनिवचः स्मरन् ॥८०॥
अनुव्रजन्ती भर्तारं जगाम मृदुगामिनी ।
द्विधेव हृदयं कृत्वा तं च कालमवेक्षती ॥८१॥

अथ भार्य्यासहायः स फलान्यादाय वीर्य्यवान् ।
कठिनं पूरयामास, ततः काष्ठान्यपाटयत् ॥८२॥
तस्य पाटयतः काष्ठं स्वेदो वै समजायत ।
व्यायामेन च तेनास्य जज्ञे शिरसि वेदना ॥८३॥

...भिवन्द्य प्रियां भार्य्यामुवाच व्यथपीड़ितः ।
...यासेन ममानेन जाता शिरसि वेदना ॥८४॥
...ङ्गानि चैव सावित्रि ! हृदयं दूयतीव च ।
...स्वस्थमिव चात्मानं लक्षये मितभाषिणि ! ॥८५॥
...शूलैरिव शिरो विद्धमिदं संलक्षयाम्यहम् ।
...स्वप्तुमिच्छे कल्याणि ! न स्थातुं शक्तिरस्ति मे" ॥८६॥
... सा समासाद्य सावित्री भर्त्तारमुपगम्य च ।
...त्सङ्गेऽस्य शिरः कृत्वा निषसाद महीतले ॥८७॥
...ततः सा नारदवचो विमृशन्ती तपस्विनी ।
...तं मुहूर्त्तं क्षणं वेलां दिवसं च युयोज ह ॥८८॥
...मुहूर्त्तादेव चापश्यत् पुरुषं रक्तवाससम् ।
...बद्धमौलिं वपुष्मन्तमादित्य-समतेजसम् ॥८९॥
...श्यामावदातं रक्ताक्षं पाशहस्तं भयावहम् ।
स्थितं सत्यवतः पार्श्वे निरीक्षन्तं तमेव च ॥९०॥
तं दृष्ट्वा सहसोत्थाय भर्त्तुर्न्यस्य शनैः शिरः ।
कृताञ्जलिरुवाचार्त्ता हृदयेन प्रवेपती ॥९१॥

सावित्र्युवाच—

"दैवतं त्वाभिजानामि वपुरेतद्ध्यमानुषम् ।
कामये ब्रूहि देवेश ! कस्त्वं, किञ्च चिकीर्षति " ॥९२॥

यम उवाच—

"पतिव्रतासि सावित्रि ! तथैव च तपोऽन्विता ।
अतस्त्वामभिभाषामि, विद्धि मां त्वं शुभे ! यमम् ॥९३॥

अयं ते सत्यवान् भर्त्ता क्षीणायुः पार्थिवात्मजः ।
नेष्यामि तमहं बद्धा विद्धेतन्मे चिकीर्षितम्" ॥८४॥

सावित्र्युवाच—
"श्रूयते भगवन् ! दूतास्तवागच्छन्ति मानुषान् ।
नेतुं किल भवान् कस्मादागतोऽसि स्वयं प्रभो !" ॥८५॥
इत्युक्तः पितृराजस्तां भगवान् स्वचिकीर्षितम् ।
यथावत् सर्वमाख्यातुं तत्प्रियार्थं प्रचक्रमे ॥८६॥
"अयं च धर्मसंयुक्तो रूपवान् गुणसागरः ।
नार्हो मत्पुरुषैर्नेतुमतोऽस्मि स्वयमागतः" ॥८...

ततः सत्यवतः कायात् पाशबद्धं वशंगतम् ।
अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्
ततः समुद्धृतप्राणं गतश्वासं हृतप्रभम् ।
निर्विचेष्टं शरीरं तद्...
यमस्तु तं ततो बद्धा प्रयातो दक्षिणामुखः ।
सावित्री चैव दुःखार्त्ता यममेवान्वगच्छत

यम उवाच—
"निवर्त्त, गच्छ सावित्रि ! यावद्गम्यं गतं
कृतं भर्त्तुस्त्वयानृण्यं कुरुष्वास्यौर्ध्वदैहिकम्" ।

सावित्र्युवाच—
"यत्र मे नीयते भर्त्ता, स्वयं वा यत्र गच्छति
मया च तत्र गन्तव्यमेष धर्मः सनातनः ॥१०"

तपसा गुरुभक्त्या च भर्त्तुः स्नेहाद् व्रतेन च ।
तव चैव प्रसादेन न मे प्रतिहता गतिः" ॥१०३॥

यम उवाच—

"निवर्त्त, तुष्टोऽस्मि तवानया गिरा
स्वराक्षर-व्यञ्जनहेतुयुक्तया ।
वरं वृणीष्वेह विनास्य जीवितं
ददानि ते सर्वमनिन्दिते ! वरम्" ॥१०४॥

सावित्र्युवाच—

"च्युतः स्वराज्याद् वनवासमाश्रितो
विनष्टचक्षुः श्वशुरो ममाश्रमे ।
स लब्धचक्षुर्बलवान् भवेन् नृप-
स्तव प्रसादाज् ज्वलनार्कसन्निभः" ॥१०५॥

यम उवाच—

"ददानि तेऽहं तमनिन्दिते ! वरं
यथा त्वयोक्तं भविता च तत् तथा ।
तवाध्वना ग्लानिमिवोपलक्षये
निवर्त्त, गच्छस्व न ते श्रमो भवेत्" ॥१०६॥

सावित्र्युवाच—

"श्रमः कुतो भर्त्तृसमीपतो हि मे ?
यतः पतिं नेष्यसि तत्र मे गतिः ।
यतो हि भर्त्ता मम सा गतिर्ध्रुवा
सुरेश ! भूयश्च वचो निबोध मे ॥१०७॥

अयं ते सत्यवान् भर्त्ता क्षीणायुः पार्थिवात्मजः ।
नेष्यामि तमहं बद्ध्वा विद्ध्येतन्मे चिकीर्षितम्" ॥८४॥

सावित्र्युवाच—

"श्रूयते भगवन् ! दूतास्तवागच्छन्ति मानुषान् ।
नेतुं किल भवान् कस्मादागतोऽसि स्वयं प्रभो !" ॥८५॥

इत्युक्तः पितृराजस्तां भगवान् स्वचिकीर्षितम् ।
यथावत् सर्वमाख्यातुं तत्प्रियार्थं प्रचक्रमे ॥८६॥

"अयं च धर्मसंयुक्तो रूपवान् गुणसागरः ।
नार्हो मत्पुरुषैर्नेतुमतोऽस्मि स्वयमागतः" ॥८७॥

ततः सत्यवतः कायात् पाशबद्धं वशंगतम् ।
अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात् ॥८८॥

ततः समुद्धृतप्राणं गतश्वासं हतप्रभम् ।
निर्विचेष्टं शरीरं तद्‌ बभूवाप्रियदर्शनम् ॥८९॥

यमस्तु तं ततो बद्ध्वा प्रयातो दक्षिणामुखः ।
सावित्री चैव दुःखार्त्ता यममेवान्वगच्छत ॥१००॥

यम उवाच—

"निवर्त्त, गच्छ सावित्रि ! यावद्‌गम्यं गतं त्वया ।
कृतं भर्त्तुस्त्वयानृण्यं कुरुष्वास्यौर्ध्वदेहिकम्" ॥१०१॥

सावित्र्युवाच—

"यत्र मे नीयते भर्त्ता, स्वयं वा यत्र गच्छति ।
मया च तत्र गन्तव्यमेष धर्मः सनातनः ॥१०२॥

तपसा गुरुभक्त्या च भर्तुः स्नेहाद् व्रतेन च ।
तव चैव प्रसादेन न मे प्रतिहता गतिः" ॥१०३॥

यम उवाच—

"निवर्त्त, तुष्टोऽस्मि तवानया गिरा
स्वराक्षर-व्यञ्जनहेतुयुक्तया ।
वरं वृणीष्वेह विनास्य जीवितं
ददामि ते सर्वमनिन्दिते ! वरम्" ॥१०४॥

सावित्र्युवाच—

"च्युतः स्वराज्याद् वनवासमाश्रितो
विनष्टचक्षुः श्वशुरो ममाश्रमे ।
स लब्धचक्षुर्बलवान् भवेन् नृप-
स्तव प्रसादाज् ज्वलनार्कसन्निभः" ॥१०५॥

यम उवाच—

"ददामि तेऽहं सर्वमनिन्दिते ! वरं
यथा त्वयोक्तं भविता च तत् तथा ।
तवाध्वना ग्लानिमिवोपलक्षये
निवर्त्त, गच्छस्व न ते श्रमो भवेत्" ॥१०६॥

सावित्र्युवाच—

"श्रमः कुतो भर्तृसमीपतो हि मे ?
यतः पतिं नेष्यसि तत्र मे गतिः ।
यतो हि भर्त्ता मम सा गतिर्ध्रुवा
सुरेश ! भूयश्च वचो निबोध मे ॥१०७॥

सतां सकृत्सङ्गतमीप्सितं परं
ततः परं मित्रमिति प्रचक्षते ।
न चाफलं सत्पुरुषेण सङ्गतं
ततः सतां संनिवसेत् समागमे " ॥१०८॥

यम उवाच —

" मनोऽनुकूलं बुधबुद्धिवर्धनं
त्वया यदुक्तं वचनं हिताश्रयम् ।
विना पुनः सत्यवतोऽस्य जीवितं
वरं द्वितीयं वरयस्व भामिनि ।" ॥१०९॥

सावित्र्युवाच —

" हृतं पुरा मे श्वशुरस्य धीमतः
स्वमेव राज्यं लभतां स पार्थिवः ।
जह्यात् स्वधर्मान् न च मे गुरुर्यथा
द्वितीयमेतद् वरयामि ते वरम् " ॥११०॥

यम उवाच

" स्वमेव राज्यं प्रतिलप्स्यतेऽचिरात्
न च स्वधर्मात् परिहास्यते नृपः ।
कृतेन कामेन मया नृपात्मजे ।
निवर्त गच्छस्व न ते श्रमो भवेत् " ॥१११॥

सावित्र्युवाच —

" अद्रोहः सर्वभूतेषु कर्मणा, मनसा, गिरा ।
अनुग्रहश्च दानं च सतां धर्मः सनातनः ॥११२॥

एवंप्रायश्च लोकोऽयं मनुष्याः शक्तिपेशलाः ।
सन्तस्त्वेवाप्यमित्रेषु दयां प्राप्तेषु कुर्वते" ॥११३॥

यम उवाच—

"पिपासितस्येव भवेद् यथा पय-
स्तथा त्वया वाक्यमिदं समीरितम् ।
विना पुनः सत्यवतोऽस्य जीवितं
वरं वृणीष्वेह शुभे ! यदिच्छसि" ॥११४॥

सावित्र्युवाच—

"ममानपत्यः पृथिवीपतिः पिता
भवेत् पितुः पुत्रशतं तथौरसम् ।
कुलस्य सन्तानकरं च यद् भवेत्
तृतीयमेतद् वरयामि ते वरम्" ॥११५॥

यम उवाच—

"कुलस्य सन्तानकरं सुवर्चसं
शतं सुतानां पितुरस्तु ते शुभे !
कृतेन कामेन नराधिपात्मजे !
निवर्त्त, दूरं हि पथस्त्वमागता" ॥११६॥

सावित्र्युवाच—

"विवस्वतस्त्वं तनयः प्रतापवां-
स्ततो हि वैवस्वत उच्यसे बुधैः ।
समेन धर्मेण चरन्ति ताः प्रजा-
स्ततस्तवेहेश्वर ! धर्मराजता ॥११७॥

आत्मन्यपि न विश्वासस्तथा भवति सत्सु यः ।
तस्मात् सत्सु विशेषेण सर्व्वः प्रणयमिच्छति " ॥११८॥

यम उवाच—

"उदाहृतं ते वचनं यदङ्गने !
शुभे ! न तादृक् त्वदृते श्रुतं मया ।
अनेन तुष्टोऽस्मि, विनास्य जीवितं
वरं चतुर्थं वरयस्व गच्छ च " ॥११९॥

सावित्र्युवाच—

"ममात्मजं सत्यवतस्तयोरसं
भवेदुभाभ्यामिह यत् कुलोद्भवम् ।
शतं सुतानां बलवीर्य्यशालिना-
मिदं चतुर्थं वरयामि ते वरम् " ॥१२०॥

यम उवाच—

" शतं सुतानां बल-वीर्य्यशालिनां
भविष्यति प्रीतिकरं तवाङ्गने !
परिश्रमस्ते न भवेन् नृपात्मजे !
निवर्त्त, दूरं हि पथस्त्वमागता " ॥१२१॥

सावित्र्युवाच—

" न च प्रमादः सत्पुरुषेषु मोघो
न चाप्यर्थो नश्यति नापि मानः ।
यस्मादेतन्नियतं सत्सु नित्यं
तस्मात् सन्तो रक्षितारो भवन्ति " ॥१२२॥

यम उवाच—

"यथा यथा भाषसि धर्मसंहितं
मनोऽनुकूलं सुपदं महार्थवत् ।
तथा तथा मे त्वयि भक्तिरुत्तमा
वरं वृणीष्वाप्रतिमं पतिव्रते ।" ॥१२३॥

सावित्र्युवाच—

" न कामये भर्तृविनाकृता सुखं
न कामये भर्तृविनाकृता दिवम् ।
न कामये भर्तृविनाकृता श्रियं
न भर्तृहीना व्यवसामि जीवितुम् ॥१२४॥
वरातिसर्गः शतपुत्रता मम
त्वयैव दत्तो ह्रियते च मे पतिः ।
वरं वृणे, 'जीवतु सत्यवानयं'
तवैव सत्यं वचनं भविष्यति " ॥१२५॥

"तथे"त्युक्त्वा तु तं पाशं मुक्त्वा वैवस्वतो यमः ।
धर्मराजः प्रहृष्टात्मा सावित्रीमिदमब्रवीत् ॥१२६॥
"एष भद्रे ! मया मुक्तो भर्ता ते कुलनन्दिनि !
अरोगस्तव नेयश्च सिद्धार्थः स भविष्यति ॥१२७॥
चतुर्वर्षशतायुश्च त्वया सार्धमवाप्स्यति ।
इष्ट्वा यज्ञैश्च धर्मेण ख्यातिं लोके गमिष्यति" ॥१२८॥
एवं तस्यै वरं दत्त्वा धर्मराजः प्रतापवान् ।
निवर्तयित्वा सावित्रीं स्वमेव भवनं ययौ ॥१२९॥

सावित्र्यपि यमे याते भर्तारं प्रतिलभ्य च ।
जगाम तत्र यत्रास्या भर्तुः शावं कलेवरम् ॥१२०॥
सा भूमौ प्रेक्ष्य भर्तारमुपसृत्योपगुह्य च ।
उत्सङ्गे शिर आरोप्य भूमावुपविवेश ह ॥१२१॥
संज्ञां च स पुनर्लब्ध्वा सावित्रीमभ्यभाषत ।
प्रोष्यागत इव प्रेम्णा पुनः पुनरुदीक्ष्य वै ॥१२२॥

सत्यवानुवाच —

"सुचिरं बत सुप्तोऽस्मि किमर्थं नावबोधितः ?
क्व चासौ पुरुषः श्यामो योऽसौ मां सञ्चकर्ष ह ? ॥१२३॥
शिरोऽभिताप-सन्तप्तः स्वप्तुं चिरमगामहम् ।
तवोत्सङ्गे प्रसुप्तोऽस्मि इति सर्वं स्मरे शुभे !" ॥१२४॥

तमुवाचाथ सावित्री, "रजनी व्यवगाहते ।
श्वस्ते सर्वं यथावृत्तमाख्यास्यामि नृपात्मज ! ॥१२५॥
उत्तिष्ठोत्तिष्ठ, भद्रं ते, पितरौ पश्य सुव्रत !
विगाढा रजनी चेयं निवृत्तश्च दिवाकरः ॥१२६॥
यदि शक्तमहं गन्तुं सरुजं त्वां हि मन्यसे ।
न च शक्नोसि पन्थानं तमसा संवृते वने ॥१२७॥
श्वः प्रभाते वने दृष्टे यास्यावोऽनुमते तव ।
वसावेह यथाभीष्टं रुचितं यदि तेऽनघ !" ॥१२८॥

सत्यवानुवाच —

"शिरोरुजा निवृत्ता मे, स्वस्थान्यङ्गानि लक्षये ।
मातापितृभ्यामिच्छामि संयोगं त्वत्प्रसादजम् ॥१२९॥

का त्ववस्था तयोरद्य मदर्थमिति चिन्तये ।
तयोरदृश्ये मयि च महद् दुःखं भविष्यति ॥१४०॥
माता वृद्धा पिता वृद्धस्तयोर्यष्टिरहं किल ।
तौ रात्रौ मामपश्यन्तौ कामवस्थां गमिष्यतः ?" ॥१४१॥
एवमुक्त्वा स धर्मात्मा गुरुभक्तो गुरुप्रियः ।
उच्छ्रित्य बाहू दुःखार्त्तः सस्वरं प्ररुरोद ह ॥१४२॥
ततोऽब्रवीत् तथा दृष्ट्वा भर्त्तारं शोककर्षितम् ।
प्रमृज्याश्रूणि पाणिभ्यां सावित्री धर्मचारिणी ॥१४३॥
"यदि मेऽस्ति तपस्तप्तं यदि दत्तं हुतं यदि ।
श्वश्रू श्वशुर भर्तॄणां मम पुण्यास्तु शर्वरी " ॥१४४॥
सावित्री तत उत्थाय केशान् संयम्य भाविनी ।
पतिमुत्थापयामास बाहुभ्यां परिगृह्य वै ॥१४५॥
उत्थाय सत्यवांश्चापि प्रमृज्याङ्गानि पाणिना ।
सर्वा दिशः समालोक्य कठिने दृष्टिमादधे ॥१४६॥
तमुवाचाथ सावित्री, "श्वः फलानि हरिष्यसि ।
योगक्षेमार्थमेतं ते नेष्यामि परशुं त्वहम्" ॥१४७॥
कृत्वा कठिनभारं सा वृक्षशाखावलम्बिनम् ।
गृहीत्वा परशुं भर्त्तुः सकाशे पुनरागमत् ॥१४८॥
वामे स्कन्धे तु वामोरुर्भर्त्तुर्बाहुं निवेश्य च ।
दक्षिणेन परिष्वज्य जगाम गजगामिनी ॥१४९॥
एतस्मिन्नेव काले तु द्युमत्सेनो महायशाः ।
नष्टचक्षुः प्रसन्नायां दृष्ट्यां सर्वं ददर्श ह ॥१५०॥

स सर्वानाश्रमान् गत्वा शैब्यया सह भार्यया ।
द्युमत्सेनः परामार्त्तिं जगाम भरतर्षभ ! ॥१५१॥
ततोऽभिसृत्य तैर्विप्रैः सर्वैराश्रमवासिभिः ।
परिवार्य समाश्वास्य तावानीतौ स्वमाश्रमम् ॥१५२॥
ब्राह्मणः सत्यवाक् तेषामुवाचेदं तपोधनः ।
"यथास्य भार्या सावित्री तपसा च दमेन च ।
आचारेण च संयुक्ता तथा जीवति सत्यवान्" ॥१५३॥
एवमाश्वासितस्तेषु सत्यवाग्भिस्तपस्विभिः ।
तांस्तान् विगणयन् सर्वांस्ततः स्थिर इवाभवत् ॥१५४॥

ततो मुहूर्त्तात् सावित्री भर्त्रा सत्यवता सह ।
आजगामाश्रमं रात्रौ प्रहृष्टा प्रविवेश ह ॥१५५॥
ततो राज्ञा सहासीनाः सर्वे ते वनवासिनः ।
जातकौतूहलाः पार्थ । पप्रच्छुर्नृपतेः सुतम् ॥१५६॥
"प्रागेव नागतं कस्मात् सभार्येण त्वया विभो !
विरात्रे चागतं कस्मात्? कोऽनुबन्धस्तवाभवत्?" ॥१५७॥

सत्यवानुवाच—

"सुप्तश्चाहं वेदनया चिरमित्युपलक्षये ।
अतो विरात्रागमनं नान्यदस्तीह कारणम्" ॥१५८॥

गौतम उवाच—

"अकस्माच्चक्षुषः प्राप्तिर्द्युमत्सेनस्य ते पितुः ।
नास्य त्वं कारणं वेत्सि, सावित्री वेत्तुमर्हति" ॥१५९॥

सावित्र्युवाच—

"मृत्युमें पत्युराख्यातो नारदेन महात्मना ।
स चाद्य दिवसः प्राप्तस्ततो नैनं जहाम्यहम् ॥१६०॥
सुप्तश्चैनं यमः साक्षादुपागच्छत् सकिङ्करः ।
स एनमनयद् बद्ध्वा दिशं पितृनिषेविताम् ॥१६१॥
अस्तौषं तमहं देवं सत्येन वचसा विभुम् ।
पञ्च वै तेन मे दत्ता वराः शृणुत तान् मम ॥१६२॥
चक्षुषी च स्वराज्यञ्च द्वौ वरौ श्वशुरस्य मे ।
लब्धं पितुः पुत्रशतं, पुत्राणां चात्मनः शतम् ॥१६३॥
चतुर्वर्षशतायुर्मे भर्त्ता लब्धश्च सत्यवान् ।
भर्त्तुर्हि जीवितार्थं तु मया चीर्णं त्विदं व्रतम्" ॥१६४॥

ऋषय ऊचुः—

"निमज्जमानं व्यसनैरभिद्रुतं
कुलं नरेन्द्रस्य तमोमये ह्रदे ।
त्वया सुशील-व्रतपुण्ययुक्तया
समुद्धृतं साध्वि ! पुनः कुलीनया" ॥१६५॥

एवमात्मा पिता माता श्वश्रूः श्वशुर एव च ।
भर्त्तुः कुलञ्च सावित्र्या सर्वं कृच्छ्रात् समुद्धृतम् ॥१६६॥

———

स सर्वानाश्रमान् गत्वा शैब्यया सह भार्यया ।
पुत्रहेतोः परामार्त्तिं जगाम भरतर्षभ ! ॥१५१॥
ततोऽभिगम्य तैर्विप्रैः सर्वैराश्रमवासिभिः ।
परिवार्य समाश्वास्य तावानीतौ स्वमाश्रमम् ॥१५२॥
ब्राह्मणः सत्यवाक् तेषामुवाचेदं तयोर्वचः ।
"यथास्य भार्या सावित्री तपसा च दमेन च ।
आचारेण च संयुक्ता तथा जीवति सत्यवान्" ॥१५३॥
एवमाश्वासितस्तेषु सत्यवाग्भिस्तपस्विभिः ।
तांस्तान् विगणयन् सर्वांस्ततः स्थिर इवाभवत् ॥१५४॥

ततो मुहूर्त्तात् सावित्री भर्त्रा सत्यवता सह ।
आजगामाश्रमं रात्रौ प्रहृष्टा प्रविवेश ह ॥१५५॥
ततो राज्ञा सहासीनाः सर्वे ते वनवासिनः ।
जातकौतूहलाः पार्थ ! पप्रच्छुर्नृपतेः सुतम् ॥१५६॥
"प्रागेव नागतं कस्मात् सभार्येण त्वया विभो !
विरात्रे चागतं कस्मात् ? कोऽनुबन्धस्तवाभवत् ?" ॥१५७॥

सत्यवानुवाच—

"सुप्तवाहं वेदनया चिरमित्युपपन्नवान् ।
अतो विलम्बागमनं नान्यदस्तीह कारणम्" ॥१५८॥

गौतम उवाच—

"अकस्माच्चक्षुषः प्राप्तिर्द्युमत्सेनस्य ते पितुः ।
नास्य त्वं कारणं वेत्सि, सावित्री वेत्तुमर्हति" ॥१५९॥

सावित्र्युवाच—

"मृत्युर्मे पत्युराख्यातो नारदेन महात्मना ।
स चाद्य दिवसः प्राप्तस्ततो नैनं जहाम्यहम् ॥१६०॥
सुप्तञ्चैनं यमः साक्षादुपागच्छत् सकिङ्करः ।
स एनमनयद् बद्ध्वा दिशं पितृनिषेविताम् ॥१६१॥
अस्तौषं तमहं देवं सत्येन वचसा विभुम् ।
पञ्च वै तेन मे दत्ता वराः शृणुत तान् मम ॥१६२॥
चक्षुषी च स्वराज्यञ्च द्वौ वरौ श्वशुरस्य मे ।
लब्धं पितुः पुत्रशतं, पुत्राणां चात्मनः शतम् ॥१६३॥
चतुर्वर्षशतायुर्मे भर्त्ता लब्धश्च सत्यवान् ।
भर्त्तुर्हि जीवितार्थं तु मया चीर्णं त्विदं व्रतम्" ॥१६४॥

ऋषय ऊचुः—

"निमज्जमानं व्यसनैरभिद्रुतं
कुलं नरेन्द्रस्य तमोमये ह्रदे ।
त्वया सुशील-व्रतपुण्ययुक्तया
समुद्धृतं साध्वि ! पुनः कुलीनया" ॥१६५॥

एवमात्मा पिता माता श्वश्रूः श्वशुर एव च ।
भर्त्तुः कुलञ्च सावित्र्या सर्वं कृच्छ्रात् समुद्धृतम् ॥१६६॥

विराटसभायां समवेतानां कृष्णादीनां युद्धविषये मन्त्रणा[1]

वैशम्पायन उवाच—

"कृत्वा विवाहं तु कुरुप्रवीरा-
स्तदाभिमन्योर्मुदिताः सपक्षाः।
विश्रम्य रात्रावुषसि प्रतीताः
सभां विराटस्य ततोऽभिजग्मुः ॥१॥
सभा तु सा मत्स्यपतेः समृद्धा
मणिप्रवेकोत्तमरत्नचित्रा।
न्यस्तासना माल्यवती सुगन्धा
तामभ्ययुस्ते नरराजवर्याः ॥२॥
अथासनान्याविशतां पुरस्ता-
दुभौ विराटद्रुपदौ नरेन्द्रौ।
वृद्धौ च मान्यौ पृथिवीपतीनां
पित्रा समं रामजनार्दनौ च ॥३॥
पाञ्चालराजस्य समीपतस्तु
शिनिप्रवीरः सहरौहिणेयः।
मत्स्यस्य राज्ञस्तु सुसन्निकृष्टौ
जनार्दनश्चैव युधिष्ठिरश्च ॥४॥

[1] उद्योगपर्व—१म अध्यायः।

सुताश्च सर्वे धृतराष्ट्रनाम्नो
भीमार्जुनौ माद्रवतीसुतौ च ।
मकुन्दधामा च गुरुं प्रणामे
विराटपुत्रैश्च महाभिमन्युः ॥५॥

सर्वे च शूराः विक्रमि समाना
वीर्येण दर्पेण बलेन चैव ।
सर्वास्त्रविद्या द्रोणदीक्षाः कुमाराः
युद्धार्थविद्येषु धराङ्गनेषु ॥६॥

तयोर्विदेषु महारथेषु
विराजमानाभरणाम्बरेषु ।
रराज सा राजवती समृद्धा
प्रदीप्तद्यौरिव नक्षपेता ॥७॥

ततः कथान्ते समवायमुक्ताः
तत्वा विचित्राः पुरुषप्रवीराः ।
सम्पूज्य हर्षं परिविश्रमार्ताः
कथां नृपस्य समुदीक्षमाणाः ॥८॥

कथान्तमासाद्य च माधवेन
संघट्टिताः पाण्डवकौरवेयाः ।
ते राजसिंहाः सहिता व्यशृण्वन्
वाक्यं महार्थं सुमहोदयं च ॥९॥

श्रीकृष्ण उवाच—

'सर्वैर्भवद्भिर्विदितं यथायं
युधिष्ठिरः सौबलेनाक्षवत्याम् ।
जितो निकृत्यापहृतं च राज्यं
वनप्रवासे समयः कृतश्च ॥१०॥

शक्तैर्विजेतुं तरसा महीं च
सत्ये स्थितैः सत्यरथैर्यथावत् ।
पाण्डोः सुतैस्तद्व्रतमुग्ररूपं
वर्षाणि षट् सप्त च चीर्णमग्र्यैः ॥११॥

त्रयोदशश्चैव सुदुस्तरोऽय-
मज्ञायमानैर्भवतां समीपे ।
क्लेशानसह्यान् विविधान् सहद्भि-
र्महात्मभिश्चापि वने निविष्टम् ।
एतैः परप्रेष्यनियोगयुक्तै-
रिच्छन्ति तत्स्वकुलेन राज्यम् ॥१२॥

एवं गते धर्मसुतस्य राज्ञो
दुर्योधनस्यापि च यद्धितं स्यात् ।
तच्चिन्तयध्वं कुरुपाण्डवानां
धर्म्यं च युक्तं च यशस्करं च ॥१३॥

अधर्मयुक्तं न च कामयेत
राज्यं पृथिव्यामपि धर्मराजः ।
धर्मार्थयुक्तं तु महीपतित्वं
ग्रामेऽपि कस्मिंश्चिदयं बुभूषेत् ॥१४॥

पित्र्यं हि राज्यं विदितं नृपाणां
यथाक्रमं धृतराष्ट्रपुत्रैः ।
मिथ्योपचारेण यथा हृतेन
सर्वं महत्यासमभाग्यरूपम् ॥१५॥

न चापि पार्थो विजितो रणे तैः
स्वतेजसा धृतराष्ट्रस्य पुत्रैः ।
तथापि राजा सहितः सुहृद्भि-
रभीप्सतेऽनामयमेव तेषाम् ॥१६॥

यत्तु स्वयं पाण्डुसुतैर्विजित्य
समाहृतं भूमिपतीन् प्रपीड्य ।
तत्प्रार्थयन्ते पुरुषप्रवीराः
कुन्तीसुता माद्रवतीसुतौ च ॥१७॥

यत्राभियुक्तैर्विविधैरुपायैः
संप्रार्थिता हन्तुमभिप्रसह्यैः ।
राज्यं जिहीर्षद्भिरमङ्गलयैः
सर्वं च तद्वो विदितं यथावत् ॥१८॥

दुर्योधनस्यापि मतं च वेत्तुं
मतं च माकाजि युधिष्ठिरस्य ।
मित्रं च मे स्यामदि तत्र कश्चि-
दुर्गीनस्पुमार्थी कुरुपाण्डवानाम् ॥१८॥

स भीष्ममासत्य कुरुपतीर्थं
वैचित्रवीर्यं च [illegible] ।
[illegible]
[illegible] ॥

[illegible]
[illegible] ।
[illegible]
[illegible] ॥

[illegible]
[illegible] ।
[illegible]
[illegible] ॥२०॥

[illegible]
[illegible] ।
[illegible]
[illegible] ॥२१॥

निवार्यमाणश्च कुरुप्रवीरः
  सर्वैः सुहृद्भिर्ह्ययमप्यतज्ज्ञः ।
स दीव्यमानः प्रतिदीव्य चैनं
  गान्धारराजस्य सुतं मताक्षम् ॥

हित्वा हि कर्णं च सुयोधनं च
  समाह्वयद्देवितुमाजमीढः ।
दुरोदरास्तत्र सहस्रशोऽन्ये
  युधिष्ठिरो यान् विषहेत जेतुम् ॥

उत्सृज्य तान् सौबलमेव चायं
  समाह्वयत्तेन जितोऽक्षवत्याम् ।
स दीव्यमानः प्रतिदेवनेन
  अक्षेषु नित्यं सुपराङ्मुखेषु

संरम्भमाणो विजितः प्रसह्य
  तत्रापराधः शकुनेर्न कश्चित् ।
तस्मात्प्रणम्यैव वचो ब्रवीतु
  वैचित्रवीर्यं बहुसामयुक्तम् ॥२४-२७॥

तथा हि शक्यो धृतराष्ट्रपुत्रः
  स्वार्थे नियोक्तुं पुरुषेण तेन ।
अयुद्धमाकाङ्क्षत कौरवाणां
  साम्नैव दुर्योधनमाह्वयध्वम् ॥२८॥

गान्ना जितोऽर्याऽर्थकरो भवेत
युद्धेऽनयो भविता नेह सोऽर्यः'" ॥३८॥

वैशम्पायन उवाच—

"एवं ब्रुवत्येव मधुप्रवीरे
शिनिप्रवीरः सहसोत्पपात ।
तच्चापि वाक्यं परिनिन्द्य तस्य
समाददे वाक्यमिदं समन्युः ॥४०॥

सात्यकिरुवाच—

'यादृशः पुरुषस्यात्मा तादृशं संप्रभाषते ।
यथारूपोऽन्तरात्मा ते तथारूपं प्रभाषसे ॥४१॥
सन्ति व पुरुषाः शूराः सन्ति कापुरुषास्तथा ।
उभावेतौ दृढौ पक्षौ दृश्येते पुरुषान् प्रति ॥४२॥
एकस्मिन्नेव जायेते कुले क्लीबमहाबलौ ।
फलाफलवती शाखे यथैकस्मिन् वनस्पतौ ॥४३॥
नाभ्यसूयामि ते वाक्यं ब्रुवतो लाङ्गलध्वज !
ये तु शृण्वन्ति ते वाक्यं तानसूयामि माधव ! ॥४४॥
कथं हि धर्मराजस्य दोषमल्पमपि ब्रुवन् ।
लभते परिषन्मध्ये व्याहर्तमकुतोभयः ? ॥४५॥
समाहूय महात्मानं जितवन्तोऽक्षकोविदाः ।
अनक्षज्ञं यथाऽऽयदं तेषु धर्मजयः कुतः ? ॥४६॥

यदि कुन्तीसुतं गते कौरवं भ्रातृभिः सह ।
अभिगम्य जयेद्युद्धे तथैषां धर्मतो भवेत् ॥४७॥

समाहूय तु राजानं क्षत्रधर्मरतं सदा ।
निकृत्या जितवन्तस्ते किं नु तेषां परं शुभम् ? ॥४८॥

कथं प्रणिपतेयायमिह कृत्वा धर्षं परम् ।
अमषाणादिसुतस्तु प्राप्तः पैतामहं पदम् ? ॥४९॥

यच्चायं परवित्तानि कामयेत युधिष्ठिरः ।
एतदप्ययमत्यन्तं परो नार्हति याचितुम् ॥५०॥

कथं च धर्मयुक्तास्ते न च राज्यं जिहीर्षवः ।
निःस्वत्वमयाभ्यस्ताम् य आहुर्विदिता इति ॥
अनुनीता हि भीष्मेण द्रोणेन विदुरेण च ।
न व्यवस्यन्ति पाण्डूनां प्रदातुं पैतृकं वसु ? ॥५१-५२॥

अहं तु साम्त्वितैर्वाक्यैरनुनीय रणे क्षमात् ।
पादयोः पातयिष्यामि कौन्तेयस्य महात्मनः ॥५३॥

अथ ते न व्यवस्यन्ति प्रणिपाताय धीमतः ।
गमिष्यन्ति महामात्या यमस्य सदनं प्रति ॥५४॥

न हि ते युयुधानस्य संरब्धस्य युयुत्सतः ।
वेगं समर्थाः संसोढुं वज्रस्येव महीधराः ॥५५॥

को हि गाण्डीवधन्वानं कश्च चक्रायुधं युधि ।
मां चापि विषहेत्क्रुद्धं कश्च भीमं दुरासदम् ॥५६॥

यमौ च दृढधन्वानौ यमकल्पौ महाद्युतौ ।
विराट द्रुपदौ वीरौ यमकालोपमद्युती ॥
को जिजीविषुरासीदेद्धृष्टद्युम्नं च पार्षतम् ।
पञ्चैतान् पाण्डवेयांश्च द्रौपद्याः कीर्तिवर्धनान् ॥
समप्रमाणान् पाण्डूनां समवीर्यान् मदोत्कटान् ।
सौभद्रं च महेष्वासममरैरपि दुःसहम् ॥
गदप्रद्युम्नसाम्बांश्च कालसूर्यानलोपमान् ?
ते वयं धृतराष्ट्रस्य पुत्रं शकुनिना सह ॥
कर्णं चैव निहत्याजावभिषेक्ष्याम पाण्डवम् ।
नाधर्मो विद्यते कश्चिच्छत्रून् हत्वाततायिनः ॥५७-११॥
अधर्म्यमयशस्यं च शात्रवाणां प्रयाचनम् ।
हृद्गतस्तस्य यः कामस्तं कुरुध्वमतन्द्रिताः ॥१२॥
धार्तराष्ट्रो ह्ययुद्धेन न राज्यं दातुमिच्छति ।
यद्य पाण्डुसुतो राज्यं लभतां वा युधिष्ठिरः ।
निहता वा रणे सर्वे स्वप्स्यन्ति वसुधातले' ॥१३॥

द्रुपद उवाच—

'एवमेतन्महाबाहो भविष्यति न संशयः ।
न हि दुर्योधनो राज्यं मधुरेण प्रदास्यति ॥१४॥
अनुवर्त्स्यति तं चापि धृतराष्ट्रः सुतप्रियः ।
भीष्मद्रोणौ च कार्पण्यान्मौर्ख्याद्राधेयसौबलौ ॥१५॥

बलदेवस्य वाक्यं तु मम ज्ञाने न युज्यते ।
एतद्धि पुरुषेणाग्रे कार्यं सुनयमिच्छता ॥६६॥

न तु वाच्यो मृदुवचो धार्तराष्ट्रः कथंचन ।
न हि मार्दवसाध्योऽसौ पापबुद्धिर्मतो मम ॥६७॥

गर्दभे मार्दवं कुर्याद्गोषु तीक्ष्णं समाचरेत् ।
मृदु दुर्योधने वाक्यं यो ब्रूयात्पापचेतसि ॥

मृदुं मे मन्यते पापो भाष्यमाणमशक्तिकम् ।
हितमर्थं न जानीयादबुद्धिर्मार्दवे सति ॥६८-६९॥

एतच्चैव करिष्यामो यत्नश्च क्रियतामिह ।
प्रस्थापयाम मित्रेभ्यो बलान्युद्योजयन्तु नः ॥७०॥

शल्यस्य धृष्टकेतोश्च जयत्सेनस्य वा विभो !
केकयानां च सर्वेषां दूता गच्छन्तु शीघ्रगाः ॥७१॥

स च दुर्योधनो नूनं प्रेषयिष्यति सर्वशः ।
पूर्वाभिपन्नाः सन्तश्च भजन्ते पूर्वचोदनम् ॥७२॥

तत्त्वरध्वं नरेन्द्राणां पूर्वमेव प्रचोदने ।
महद्धि कार्यं वोढव्यमिति मे वर्तते मतिः ॥७३॥

शल्यस्य प्रेष्यतां शीघ्रं ये च तस्यानुगा नृपाः ।
भगदत्ताय राज्ञे च पूर्वसागरवासिने ॥

अमितौजसे तथोग्राय हार्दिक्यायान्धकाय च ।
दीर्घ ॥७४-७५॥

आनीयतां बृहन्तश्च सेनाबिन्दुश्च पार्थिवः ।
सेनजित्प्रतिविन्ध्यश्च चित्रवर्मा सुवास्तुकः ॥७६॥
बाह्लीको मुञ्जकेशश्च चैद्याधिपतिरेव च ।
सुपार्श्वश्च सुबाहुश्च पौरवश्च महारथः ॥७७॥
शकानां पह्लवानां च दरदानां च ये नृपाः ।
सुरारिश्च नदीजश्च कर्णवेष्टश्च पार्थिवः ॥७८॥
नीलश्च वीरधर्मा च भूमिपालश्च वीर्यवान् ।
दुर्जयो दन्तवक्त्रश्च रुक्मी च जनमेजयः ॥७९॥
आषाढो वायुवेगश्च पूर्वपाली च पार्थिवः ।
भूरितेजा देवकश्च एकलव्यः सहात्मजैः ॥८०॥
कारूषकाश्च राजानः क्षेमधूर्तिश्च वीर्यवान् ।
काम्बोजा ऋषिका ये च पश्चिमानूपकाश्च ये ॥८१॥
जयत्सेनश्च काश्यश्च तथा पञ्चनदा नृपाः ।
क्राथपुत्रश्च दुर्धर्षः पार्वतीयाश्च ये नृपाः ॥८२॥
जानकिश्च सुशर्मा च मणिमान् पौतिमत्स्यकः ।
पांसुराष्ट्राधिपश्चैव धृष्टकेतुश्च वीर्यवान् ॥८३॥
पौण्ड्रश्च दण्डधारश्च बृहत्सेनश्च वीर्यवान् ।
अपराजितो निषादश्च श्रेणिमान् वसुमानपि ॥८४॥
बृहद्बलो महौजाश्च बाहुः परपुरंजयः ।
समुद्रसेनो राजा च सह पुत्रेण वीर्यवान् ॥८५॥
उद्भवः क्षेमकश्चैव वाटधानश्च पार्थिवः ।
श्रुतायुश्च दृढायुश्च शाल्वपुत्रश्च वीर्यवान् ॥८६॥

कुमारश्च कलिङ्गानामीशानो युद्धदुर्मदः ।
एतेषां प्रेक्षतां योद्धॄनिह मम रोचते ॥८८॥
अर्थं च ब्राह्मणो विद्वानस्य राजन् पुरोहितः ।
प्रेष्यतां धृतराष्ट्राय वाक्यमस्मै प्रदीयताम् ॥
यथा दुर्योधनो वाच्यो, यथा शान्तनवो नृपः ।
धृतराष्ट्रो यथा वाच्यो, द्रोणश्च रथिनां वरः" ॥८८ प

शरणागत-रक्षणम्

कपोत-लुब्धकसंवादः[1]

कश्चित् क्षुद्रसमाचारः पृथिव्यां कालसंमितः ।
विचचार महारण्ये घोरः शकुनिलुब्धकः ॥१॥
काकोल इव कृष्णाङ्गो रक्ताक्षः कालसंमितः ।
दीर्घजङ्घो ह्रस्वपादो महावक्त्रो महाहनुः ॥२॥
न च तस्य सुहृत् कश्चिद् सम्बन्धी न बान्धवः ।
स हि तैः संपरित्यक्तस्तेन रौद्रेण कर्मणा ॥३॥
ये नृशंसा दुरात्मानः प्राणिप्राणहरा नराः ।
उद्वेजनीया भूतानां व्याला इव भवन्ति ते ॥४॥

---

[1] आपद्धर्मपर्वणि (शान्तिपर्वणि—१४३-तमेऽध्याये)।

स वै चारकमादाय द्विजान् हत्वा वने सदा।
चकार विक्रयं तेषां पतङ्गानां जनाधिप। ॥५॥
एवं तु वर्तमानस्य तस्य वृत्तिं दुरात्मनः।
अगमत् सुमहान् कालो न चाधर्ममबुध्यत ॥६॥

ततः कदाचित् तस्याथ वनस्थस्य समन्ततः।
पातयन्निव वृक्षांस्तान् सुमहान् वातसंभ्रमः ॥७॥
वारिधारासमूहेन संप्रहृष्टः शतक्रतुः।
क्षणेन पूरयामास सलिलेन वसुन्धराम् ॥८॥
ततो धाराकुले काले संभ्रमन्नष्टचेतनः।
शीतार्तस्तद्वनं सर्वमाकुलेनान्तरात्मना।
नैव निम्नं स्थलं वापि सोऽविन्दत विहङ्गहा।
पूरितो हि जलौघेन तस्य मार्गो वनस्य तु ॥८-१०॥
पक्षिणो वर्षवेगेन हता लीनास्तदाभवन्।
मृगाः सिंहा वराहाश्च स्थलमाश्रित्य शेरते ॥११॥
महता वातवर्षेण त्रासितास्ते वनौकसः।
भयार्ताश्च क्षुधार्ताश्च बभ्रमुः सहिता वने ॥१२॥

स तु शीताहतैर्गात्रैर्जगाम न तस्थिवान्।
ददर्श पतितां भूमौ कपोतीं शीतविह्वलाम् ॥१३॥
दृष्टार्तोऽपि हि पापात्मा स तां पञ्जरकेऽक्षिपत्।
स्वयं दुःखाभिभूतोऽपि दुःखमेवाकरोत् परे।
पापात्मा पापकारित्वात् पापमेव चकार सः ॥१४॥

सोऽप्यवसत्तयण्डेषु मेघनीलं वनस्थलिम् ।
सेव्यमानं विहङ्गौघैश्छायायाम-फलार्थिभिः ।
धाता परोपकाराय स साधुरिव निर्मितः ॥१५॥
अथाभवत् क्षणेनैव वियद् विमलतारकम् ।
महत् सर इवोत्फुल्लं कुमुदच्छुरितोदकम् ॥१६॥
ताराढ्यं कुमुदाकारमाकाशं निर्मलं वपु ।
घनैर्मुक्तं नभो दृष्ट्वा लुब्धकः शीतविह्वलः ।
दिशो विलोकयामास विगाढां प्रेक्ष्य शर्वरीम् ॥१७॥
"दूरतो मे निवेशाय देशादस्मात्" स चिन्तयन् ।
कृतबुद्धिर्मे तस्मिन् वस्तुं तां रजनीं ततः ।
साञ्जलिः प्रणतिं कृत्वा वाक्यमाह वनस्पतिम् ।
"शरणं यामि यान्यस्मिन् दैवतानि वनस्पतौ" ॥१८॥
स शिलायां शिरः कृत्वा पर्णान्यास्तीर्य भूतले ।
दुःखेन महताविष्टस्ततः सुष्वाप पक्षिहा ॥२०॥
अथ तस्य तु शाखायां विहङ्गः मधुरस्वनः ।
दीर्घकालोषितो राजंस्तत्र चित्रतनूरुहः ॥२१॥
तस्य कल्यगता भार्या चरितुं नाभ्यवर्तत ।
प्राप्तां च रजनीं दृष्ट्वा स पक्षी पर्यतप्यत ॥२२॥
"वातवर्षं महच्चासीन्न चागच्छति मे प्रिया ।
किन्नु तत्कारणं येन साद्यापि न निवर्तते ॥२३॥
अपि स्वस्ति भवेत् तस्याः प्रियाया मम कानने ।
तया विरहितं चेदं शून्यमद्य गृहं मम ॥२४॥

पुत्र-पौत्र-वधू-भृत्यैराकीर्णमपि सर्वतः ।
भार्याहीनं गृहस्थस्य शून्यमेव गृहं भवेत् ॥२५॥
न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।
गृहं तु गृहिणीहीनमरण्यसदृशं मतम् ॥२६॥
यदि सा रक्तनेत्रान्ता चित्राङ्गी मधुरस्वरा ।
अद्य नायाति मे कान्ता न कार्यं जीवितेन मे ॥२७॥
न भुङ्क्ते मय्यभुक्ते या, नास्नाति स्नाति सुव्रता ।
नातिष्ठत्युपतिष्ठेत, न शेतेऽशयिते मयि ॥२८॥
हृष्टे भवति सा हृष्टा, दुःखिते मयि दुःखिता ।
प्रोषिते दीनवदना, क्रुद्धे च प्रियवादिनी ॥२९॥
पतिव्रता पतिगतिः पतिप्रियहिते रता ।
यस्य स्यात् तादृशी भार्या धन्यः स पुरुषो भुवि ॥३०॥
सा हि श्रान्तं क्षुधार्तं च जानीते मां तपस्विनी ।
अनुरक्ता स्थिरा चैव भक्ता स्निग्धा यशस्विनी ॥३१॥
वृक्षमूलेऽपि दयिता यस्य तिष्ठति तद् गृहम् ।
प्रासादोऽपि तया हीनः कान्तार इति निश्चितम् ॥३२॥
धर्मार्थकामकालेषु भार्या पुंसः सहायिनी ।
विदेशगमने चास्य सैव विश्वासकारिका ॥३३॥
भार्या हि परमो ह्यर्थः पुरुषस्येह पठ्यते ।
असहायस्य लोकेऽस्मिँल्लोकयात्रा-सहायिनी ॥३४॥
तथा रोगाभिभूतस्य नित्यं कृच्छ्रगतस्य च ।
नास्ति भार्यासमं किञ्चिन्नरस्यार्तस्य भेषजम् ॥३५॥

नास्ति भार्यासमो बन्धुर्नास्ति भार्यासमा गतिः ।
नास्ति भार्यासमो लोके सहायो धर्मसंग्रहे ॥३६॥
यस्य भार्या गृहे नास्ति साध्वी च प्रियवादिनी ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्" ॥३७॥

एवं विलपतस्तस्य श्रुत्वा तु करुणं वचः ।
गृहीता शकुनिघ्नेन कपोती वाक्यमब्रवीत् ॥३८॥

कपोत्युवाच—

"अहोऽतीव सुभाग्याहं यस्या मे दयितः पतिः ।
असतो वा सतो वापि गुणानेव प्रभाषते ॥३९॥
न सा स्त्री ह्यभिमन्तव्या यस्यां भर्ता न तुष्यति ।
तुष्टे भर्तरि नारीणां तुष्टाः स्युः सर्वदेवताः ॥४०॥
दावाग्निनेव निर्दग्धा सपुष्पस्तबका लता ।
भस्मीभवति सा नारी यस्या भर्ता न तुष्यति" ॥४१॥

इति संचिन्त्य दुःखार्ता भर्तारं दुःखितं तदा ।
कपोती लुब्धकेनापि गृहीता वाक्यमब्रवीत् ॥४२॥
"हन्त ! वक्ष्यामि ते श्रेयः, श्रुत्वा तु कुरु तत् तथा ।
शरणागतसंत्राता भव कान्त ! विशेषतः ॥४३॥
एष शाकुनिकः शेते तवावासं समाश्रितः ।
शीतार्तश्च क्षुधार्तश्च पूजामस्मै समाचर ॥४४॥
यो हि कश्चिद् द्विजं हन्याद्, गां च लोकस्य मातरम् ।
शरणागतं च यो हन्यात्, तुल्यं तेषां च पातकम् ॥४५॥

यस्तु धर्मं यथायथं स्वकर्मणो ह्यनुवर्तते ।
स प्रेत्य लभते लोकानक्षयानिति श्रुतम् ॥४६॥
न त्वं सन्तानरक्षार्थं पुत्रवानसि च द्विज ।
[illegible] परिगृह्य च ।
पुत्रानन्यान् [illegible] मतो यथा " ॥४७॥
इति [illegible] ।
[illegible] ॥४८॥

स [illegible] वचनं श्रुत्वा धर्मं [illegible] ।
[illegible] ॥४९॥
[illegible] ।
[illegible] ॥५०॥
उवाच, " [illegible] ।
[illegible] ॥५१॥
[illegible] ।
[illegible] ॥५२॥
[illegible] ।
[illegible] ॥५३॥
[illegible] ।
[illegible] ॥५४॥
[illegible] ।
[illegible] ॥५५॥

तद् ब्रूहि मां सुविस्रब्धो यत्त्वं वाचा वदिष्यसि ।
तत् करिष्याम्यहं सर्वं, मा त्वं शोके मनः कृथाः" ॥५६॥
तस्य तद्वचनं श्रुत्वा शकुनेर्लुब्धकोऽब्रवीत् ।
"बाधते खलु मां शीतं, हिमत्राणं विधीयताम्" ॥५७॥
एवमुक्तस्ततः पक्षी पर्णान्यास्तीर्य भूतले ।
यथाशक्ति हि पर्णेन ज्वलनार्थे द्रुतं ययौ ॥५८॥
स गत्वाङ्गारकर्मान्तं गृहीत्वाग्निमथागमत् ।
ततः शुष्केषु पर्णेषु पावकं सोऽप्यदीपयत् ॥५९॥
स सन्दीप्तं महत् कृत्वा तमाह शरणागतम् ।
"प्रतापय सुविस्रब्धः स्वगात्राण्यकुतोभयः" ॥६०॥
स तथोक्तस्तथेत्युक्त्वा लुब्धो गात्राण्यतापयत् ।
अग्निप्रत्यागतप्राणस्ततः प्राह विहङ्गमम् ॥६१॥
"दत्तमाहारमिच्छामि त्वया, क्षुद् बाधते हि माम्" ।
स तद्वचः प्रतिश्रुत्य वाक्यमाह विहङ्गमः ॥६२॥
"न मेऽस्ति विभवो येन नाशयेयं क्षुधां तव ।
उत्पन्नेन हि जीवामो वयं नित्यं वनौकसः ॥६३॥
सञ्चयो नास्ति चास्माकं मुनीनामिव भोजने" ।
इत्युक्त्वा तं तदा तत्र विवर्ण-वदनोऽभवत् ॥६४॥
मुहूर्ताल्लब्धसंज्ञस्तु स पक्षी पक्षिघातिनम् ।
उवाच, "तर्पयिष्ये त्वां मुहूर्तं प्रतिपालय" ॥६५॥
इत्युक्त्वा शुष्कपर्णैस्तु समुज्ज्वाल्य हुताशनम् ।
हर्षेण महताविष्टः स पक्षी वाक्यमब्रवीत् ॥६६॥

"स्त्रीणां दीयमानो च विष्णुनाथ महामनाम् ।
श्रुत: पूर्वं मया धर्मो महामतिनिपुणमें ॥१७॥
तत्कथानुपदं सौम्य ! सदयमेतद् ददामि ते । ।
दर्शय मम देहेन साधो । गमय ते गुणाम्" ॥१८॥
तत: [illegible] च धर्मो महामतिः ।
तस्मिन् ति: परिक्रम्य प्रविवेश महामतिः ॥१९॥

[illegible] तु [illegible] तु [illegible] ।
[illegible] ॥२०॥
[illegible] ।
[illegible] ॥२१॥
[illegible] ।
[illegible] ॥२२॥
[illegible] ।
[illegible] ॥२३॥
[illegible] ।
[illegible] ।
[illegible] ॥२४॥
[illegible] ।
[illegible] ॥२५॥
[illegible] ।
[illegible] ॥२६॥

क्षुत्-पिपासातप-सह: क्षमो धमनि-सन्तत: ।
उपवासैर्बहुविधैरचिंये पारलौकिकम् ॥७७॥
अहो ! देहप्रदानेन दर्शितातिथिपूजना ।
तस्मादहमपि चरिष्यामि, धर्मो हि परमा गतिः" ॥७८॥

एवमुक्त्वा विनिश्चित्य रौद्रकर्मा स लुब्धकः ।
महाप्रस्थानमाश्रित्य प्रययौ संशितव्रतः ॥७९॥
ततो यष्टिं शलाकां च जालकं पञ्जरं तथा ।
तां च बद्धां कपोतीं स प्रमुच्य विससर्ज ह ॥८०॥
ततो गते शाकुनिके कपोती प्राह दुःखिता ।
संस्मृत्य सा च भर्तारं रुदती शोककर्षिता ॥८१॥
"नाहं ते विप्रियं कान्त ! कदाचिदपि संस्मरे ।
सर्वापि विधवा नारी बहुपुत्रापि शोचते ॥८२॥
नास्ति भर्तृसमो नाथो, नास्ति भर्तृसमं सुखम् ।
विसृज्य धनसर्वस्वं भर्ता वै शरणं स्त्रियाः ॥८३॥
न कार्यमिह मे नाथ ! जीवितेन त्वया विना ।
पतिहीना तु का नारी सती जीवितुमुत्सहेत् ?" ॥८४॥

एवं विलप्य बहुधा करुणं सा सुदुःखिता ।
पतिव्रता सम्प्रदीप्तं प्रविवेश हुताशनम् ॥८५॥
ततः स्वर्गं गतः पक्षी विमानवरमास्थितः ।
कर्मभिः पूजितस्तत्र रेमे स सह भार्यया ॥८६॥

कथासरित्सागरः

जीमूतवाहन-चरितम्[1]

अस्त्यखिलक्ष्माजनयिता नगेन्द्रो हिमवानिति ।
न केवलं गिरीणां यो गुरुर्गौरीपतेरपि ॥१॥
विद्याधरनिवासे च तस्मिन् विद्याधराधिपः ।
उवास राजा जीमूतकेतुर्नाम महाचले ॥२॥
तस्याभूत् कल्पतरुरस्य गृहे पितृक्रमागतः ।
नाम्नान्वर्थेन विख्यातो यो मनोरथदायकः ॥३॥

कदाचिच्च स जीमूतकेतू राजाभ्युपेत्य तम् ।
उद्याने देवताकारं कल्पद्रुममयाचत ॥४॥
"सर्वदा प्राप्यतेऽस्माभिस्त्वत्तः सर्वमभीप्सितम् ।
तदपुत्राय मे देहि देव ! पुत्रं गुणान्वितम्" ॥५॥
ततः कल्पद्रुमोऽवादीद् "राजन्नुत्पत्स्यते तव ।
जातिस्मरो दानवीरः सर्वभूतहितः सुतः" ॥६॥
तच्छ्रुत्वा स प्रहृष्टः सन् कल्पवृक्षं प्रणम्य तम् ।
गत्वा निवेद्य तद्राजा निजां देवीमनन्दयत् ॥७॥

---

[1] कथासरित्सागरे—चतुर्थे लम्बके द्वितीये तरङ्गे ।

अथ तस्याचिरादेव राज्ञः सुनुरजायत ।
जीमूतवाहनं तं च नाम्ना स विदधे पिता ॥८॥
ततः सहजया सार्धं सर्वभूतानुकम्पया ।
जगाम स महासत्त्वो वृद्धिं जीमूतवाहनः ॥९॥
क्रमाच्च यौवराज्यस्थः परिचर्याप्रसादितम् ।
लोकानुकम्पी पितरं विजने स व्यजिज्ञपत् ॥१०॥
"जानामि तात ! यद् भावा भवेऽस्मिन् क्षणभङ्गुराः ।
स्थिरं तु महतामेकमाकल्पममलं यशः ॥११॥
परोपकारसम्भूतं तदेव यदि, हन्त ! तत् ।
किमन्यत् स्यादुदाराणां धनं प्राणाधिकं प्रियम् ॥१२॥
सम्पच्च विद्युदिव सा लोकलोचनखेदकृत् ।
लोला क्वापि लयं याति या परानुपकारिणी ॥१३॥
तदेष कल्पविटपी कामदो योऽस्ति नः, स चेत् ।
परार्थे विनियुज्येत, तदाप्तं तत् फलं भवेत् ॥१४॥
तत्तथाहं करोम्येष यथैतस्य समृद्धिभिः ।
अदरिद्रा भवत्येषा सर्वार्थिजनसंहतिः" ॥१५॥
इति विज्ञाप्य पितरं तदनुज्ञामवाप्य सः ।
जीमूतवाहनो गत्वा तं कल्पद्रुममब्रवीत् ॥१६॥
"देव ! त्वं अस्मदाद्यभीष्टफलदायकः ।
तदेकमिदमद्य त्वं मम पूरय वाञ्छितम् ॥१७॥
अदरिद्रां कुरुष्वैतां पृथिवीमखिलां सखे !
स्वस्त्यस्तु ते, प्रदत्तोऽसि लोकाय द्रविणार्थिने" ----

इत्युक्तस्तेन धीरेण कल्पवृक्षो ववर्ष सः ।
कनकं भूतले भूरि, ननन्दुश्चाखिलाः प्रजाः ॥१९॥
"दयालुर्बोधिसत्त्वांशः कोऽन्यो जीमूतवाहनात् ।
प्रकुर्यादर्थिसात्कर्तुमपि कल्पद्रुमं क्षितौ ?" ॥२०॥
इति जातानुरागासु ततो दिक्षु विदिक्ष्वपि ।
जीमूतवाहनस्योच्चैः पप्रथे विशदं यशः ॥२१॥ १४
ततः पुत्रप्रथाबद्धमूलं राज्यं समत्सराः ।
दृष्ट्वा जीमूतकेतोस्तद्गोत्रजा विकृतिं ययुः ॥२२॥
दानोपयुक्त-सत्कल्पद्रुममुक्तास्पदं च तत् ।
मेनिरे निष्प्रभावत्वाज्जेतुं सुकरमेव ते ॥२३॥
ततः सम्भूय युद्धाय कृतबुद्धिषु तेषु च ।
पितरं तमुवाचैनं धीरो जीमूतवाहनः ॥२४॥
"यथा शरीरमेवेदं जलबुद्बुदसन्निभम् ।
प्रवातदीपचपलास्तथा कस्य कृते श्रियः ? ॥२५॥
ताश्चान्योपमर्देन मनस्वी कोऽभिवाञ्छति ?
तस्मात्तात ! मया नैव योद्धव्यं गोत्रजैः सह ॥२६॥
राज्यं त्यक्त्वा तु गन्तव्यमितः क्वापि वनं मया ।
आसतां कृपणा एते, मा भूत् स्वकुलसंक्षयः" ॥२७॥
इत्युक्तवन्तं जीमूतवाहनं स पिता ततः ।
जीमूतकेतुरप्येवं जगाद कृतनिश्चयः ॥२८॥
"मयापि पुत्र ! गन्तव्यं, का हि वृद्धस्य मे स्पृहा ?
राज्ये तृण इव त्यक्ते यूनापि कृपया त्वया" ॥२९॥

एवमुक्तवता सार्द्धं सभार्य्येण "तथे"ति सः ।
पित्रा जगाम जीमूतवाहनो मलयाचलम् ॥१०॥
तत्राधिवासे सिद्धानां चन्दनच्छन्ननिर्झरे ।
स तस्थावाश्रमपदे परिचर्य्यापरः पितुः ॥११॥

अथ सिद्धाधिराजस्य सखो विश्वावसोः सुतः ।
मित्रं मित्रावसुर्नाम तस्यात्र समपद्यत ॥१२॥
तत्स्वसारञ्च सोऽपश्यदेकान्ते जातु कन्यकाम् ।
जन्मान्तरप्रियतमां ज्ञानी जीमूतवाहनः ॥१३॥
तत्कालं च तयोस्तुल्यं यूनोरन्योन्यदर्शनम् ।
अभून्मनोमृगासक्तवागुराबन्धविभ्रमम् ॥१४॥

ततोऽकस्मात् समभ्येत्य त्रिजगत्पूज्यमेकदा ।
जीमूतवाहनं प्रीतः स मित्रावसुरभ्यधात् ॥१५॥
"कन्या मलयवत्याख्या स्वसा मेऽस्ति कनीयसी ।
तामहं ते प्रयच्छामि, मदिच्छां मान्यथा कृथाः" ॥१६॥
तच्छ्रुत्वैव स जीमूतवाहनोऽपि जगाद तम् ।
"युवराज ! ममाभूत् सा भार्य्या पूर्व्वेऽपि जन्मनि ॥१७॥
त्वञ्च तत्रैव मे जातो द्वितीयं हृदयं सुहृत् ।
जातिस्मरोऽस्म्यहं, सर्व्वं पूर्व्वजन्म स्मरामि तत् ॥१८॥
किन्तु पूर्व्वस्थितौ गत्वा मम पित्रोर्निवेदय ।
तयोः प्रमाणीकृतयोः सिध्यत्येतत्तवेप्सितम्" ॥१९॥

इत्थं निशम्य जीमूतवाहनात् प्रीतमानसः
गत्वा मित्रावसुः सर्व्वं तत्पितृभ्यां शशंस तत् ॥२०॥

अभिनन्दितमाकर्ण्य ताभ्यां हृष्टस्तदैव सः ।
युवराजो विवाहाय सम्भारमकरोत् प्रभुः ॥४१॥
ततो जग्राह विधिवत्तस्याः जीमूतवाहनः ।
पाणिं मलयवत्याः स सिद्धराजपुरस्कृतः ॥४२॥
कृतोद्वाहस्ततस्तस्थौ तस्मिन् जीमूतवाहनः ।
मलयाद्रौ महार्हेण विभवेन वधूसखः ॥४३॥
एकदा च श्वशुर्य्येण स मित्रावसुना सह ।
वेलावनानि जलधेरवलोकयितुं ययौ ॥४४॥
तत्रापश्यच्च पुरुषं युवानं विग्नमागतम् ।
निवर्त्तयन्तं जननीं "हा पुत्रे"ति विराविणीम् ॥४५॥
अपरेण परित्यक्तं भटेनेवानुयायिना ।
पुरुषेण पृथूत्तुङ्गमापय्यैकं शिलातलम् ॥४६॥
"कस्त्वं ? किमीहसे ? किञ्च माता त्वां शोचती"ति तम् ।
स पप्रच्छ, ततः सोऽपि तस्मै वृत्तान्तमब्रवीत् ॥४७॥
"पुरा कश्यपभार्य्ये द्वे कद्रूश्च विनता तथा ।
मिथः कथाप्रसङ्गेन विवादं किल चक्रतुः ॥४८॥
आद्या श्यामान् रवेरश्वानवादीदपरा सितान् ।
अन्योऽन्यदासभावश्च पणमत्र बबन्धतुः ॥४९॥
ततो जयार्थिनी कद्रूः स्वैरं नागैर्निजात्मजैः ।
विषफूत्कार-मलिनानर्कस्याश्वानकारयत् ॥५०॥
तादृशांश्चोपदर्श्यैतान् विनतां छद्मना जिताम् ।
दासीचकार, कष्टा हि स्त्रीणामन्यासहिष्णुता ॥५१॥

"तद् बुद्ध्वागत्य विनतातनयो गरुडस्तदा ।
सान्त्वेन मातुर्दास्यमुक्तिं कद्रूमयाचत ॥५२॥
ततः कद्रूसुता नागा विचिन्त्यैवं तमब्रुवन् ।
'भो वैनतेय ! क्षीराब्धिः प्रारब्धो मथितुं सुरैः ॥५३॥
ततः सुधां समाहृत्य प्रतिवस्तु प्रयच्छ नः ।
मातरं स्वीकुरुष्वाथ भवान् हि बलिनां वरः' ॥५४॥
"एतन्नागवचः श्रुत्वा गत्वा च क्षीर-वारिधिम् ।
सुधार्थे दर्शयामास गरुड़ो गुरु पौरुषम् ॥५५॥
ततः पराक्रमप्रीतो देवस्तत्र स्वयं हरिः ।
'तुष्टोऽस्मि ते, वरं कञ्चिद् वृणीष्वे'त्यादिदेश तम् ॥५६॥
'नागा भवन्तु मे भक्ष्या' इति सोऽपि हरेस्ततः ।
वैनतेयो वरं वव्रे मातुर्दास्येन कोपितः ॥५७॥
'तथे'ति हरिणादिष्टो निजवीर्यार्जितामृतः ।
स चैवमथ शक्रेण गदितो ज्ञातवस्तुना ॥५८॥
'तथा पक्षीन्द्र ! कार्य्यं ते यथा मूढैर्न भुज्यते ।
नागैः सुधा, यथा चैनां तेभ्यः प्रत्याहराम्यहम्' ॥५९॥
"एतच्छ्रुत्वा 'तथे'त्युक्त्वा स वैष्णव वरोद्धुरः ।
सुधाकलशमादाय तार्क्ष्यो नागानुपाययौ ॥६०॥
वरप्रभावभीतांश्च मुग्धानाराच्चगाद तान् ।
'इदमानीतममृतं, मुक्त्वाम्बां मम गृह्यताम् ॥६१॥
भयं चेत् स्थापयाम्येतदहं वो दर्भसंस्तरे ।
उन्मोच्याम्बां च गच्छामि, स्वीकुरुध्वमितः सुधाम्' ॥६२॥

'तथेत्युक्ते च तैर्नागैः स पवित्रे कुशास्तरे ।
सुधाकलशमाधत्त, ते चाप्य जननीं जहुः ॥६३॥
दास्यमुक्ताञ्च कृत्वैवं मातरं गरुडे गते ।
यावदाददते नागा निःशङ्कास्तात् किलामृतम् ।
तावन्निपत्य सहसा तान् विमोह्य स्वशक्तितः ।
तं सुधाकलशं शक्रो जहार कुशसंस्तरात् ॥६४-६५॥
विषण्णास्तेऽथ नागास्तं लिलिहुर्दर्भसंस्तरम् ।
कदाचिदमृतस्येति लेपोऽप्यस्मिन् भवेदिति ॥६६॥
तेन पाटितजिह्वास्ते वृथा प्रापुर्द्विजिह्वताम् ।
हास्यादृते किमन्यत् स्यादतिलौल्यवतां फलम् ॥६७॥

"अथालब्धामृतरसान् नागान् वैरी हरेर्वरात् ।
तार्क्ष्यः प्रवृत्ते भोक्तुं तानभिपत्य पुनः पुनः ॥६८॥
तदापाते च पातालं त्रासनिर्जीवराजिलम् ।
प्रभ्रष्टगर्भिणीगर्भमभूत् क्षपितपन्नगम् ॥६९॥
तं दृष्ट्वा चान्वहं तत्र वासुकिर्भुजगेश्वरः ।
तत्क्षयमेकपदे नष्टं नागलोकममन्यत ॥७०॥

"ततो दुर्वारवीर्यस्य तार्क्ष्यस्तस्य विचिन्त्य सः ।
समयं प्रार्थनापूर्वं चकारैवं गरुत्मतः ॥७१॥
'एकमेकं प्रतिदिनं नागं ते प्रेषयाम्यहम् ।
आहारहेतोः पक्षीन्द्र! पयोधि-पुलिनाचले ॥७२॥
पाताले तु प्रवेष्टव्यं न त्वया मर्दकारिणा ।
नागलोकक्षयात् स्वार्थस्तवैव हि विनश्यति' ॥७३॥

इति वासुकिना प्रोक्तस्तथेति गरुडोऽन्वहम् ।
तत्प्रेषितमिहैकैकं नागं भोक्तुं प्रचक्रमे ॥७४॥
तेन क्रमेण चासंख्याः फणिनोऽत्र क्षयं गताः ।
अहं च शङ्खचूडाख्यो नागो वारो ममाद्य च ॥७५॥
अतोऽहं गरुडाहारहेतोर्वध्यशिलामिमाम् ।
मातुश्च शोच्यतां प्राप्तो नागराजनिदेशतः" ॥७६॥

इति तस्य वचः श्रुत्वा शङ्खचूडस्य दुःखितः ।
सान्तःखेदः स जीमूतवाहनस्तमभाषत ॥७७॥
"अहो ! किमपि निःसत्त्वं राजत्वं बत वासुकेः ।
यत् स्वहस्तेन नीयन्ते रिपोरामिषतां प्रजाः ॥७८॥
किं न प्रथममात्मैव तेन दत्तो गरुत्मते ?
क्लीबेनाभ्यर्थिता केयं स्वकुलक्षयसाक्षिता ? ॥७९॥
उत्पद्य कश्यपात् पापं तार्क्ष्योऽपि कुरुते कियत् !
देहमात्रकृते मोहः कीदृशो महतामपि ! ॥८०॥
तदहं तावदद्यैकं रक्षामि त्वां गरुत्मतः ।
स्वशरीरप्रदानेन मा विषादं कृथाः सखे !" ॥८१॥

तच्छ्रुत्वा शङ्खचूडोऽपि धैर्यादेतदुवाच तम् ।
"शान्तमेतन्महासत्त्व ! मास्मैवं भाषथाः पुनः ॥८२॥
न काचस्य कृते जातु युक्ता मुक्तामणेः क्षतिः ।
न चाप्यहं गमिष्यामि कथां कुलकलङ्किताम्" ॥८३॥
इत्युक्त्वा तं निषिध्यैव साधुर्जीमूतवाहनम् ।
मत्वा गरुडवेलां च स [illegible] ।

शङ्खचूडो ययौ तत्र वारिधेस्तीरवर्त्तिनम् ।
अन्तकाले नमस्कर्त्तुं गोकर्णाख्यमुमापतिम् ॥८४-८५॥
गते तस्मिन् स कारुण्यनिधिर्जीमूतवाहनः ।
तद्याणायात्मदानेन बुबुधे लब्धमन्तरम् ॥८६॥
ततस्तद् विस्मृतमिव क्षिप्रं कृत्वा स्वयुक्तितः ।
कार्य्यापदेशाद् व्यसृजन्निजं मित्रावसुं गृहम् ॥८७॥
तावच्च समासन्न-तार्क्ष्यपक्षानिलाहता ।
तत्सत्त्वदर्शनाश्चर्य्यादिव सा भूरघूर्णत ॥८८॥
तेनाहि-रिपुमायान्तं मत्वा जीमूतवाहनः ।
परानुकम्पी तां वध्यशिलामध्यारुरोह सः ॥८९॥
क्षणाच्चात्र निपत्यैव महासत्त्वं जहार तम् ।
आहत्य चञ्च्वा गरुडः स्वच्छायाच्छादिताम्बरः ॥९०॥
परिस्रवद्रक्तधारं च्युतोत्खातशिखामणिम् ।
नीत्वा भक्षयितुं चैनमारेभे शिखरे गिरेः ॥९१॥
तत्काले पुष्पवृष्टिश्च निपपात नभस्तलात् ।
तद्दर्शनाच्च "किं न्वेतदि"ति तार्क्ष्यो विसिस्मिये ॥९२॥
तावत् स शङ्खचूडोऽत्र नत्वा गोकर्णमागतः ।
ददर्श रुधिरासारसिक्तं वध्यशिलातलम् ॥९३॥
"हा धिङ् मदर्थं तेनात्मा दत्तो नूनं महात्मना ।
तत् कुत्र नीतस्तार्क्ष्येण क्षणेऽस्मिन् स भविष्यति ? ॥९४॥
अन्विष्यामि द्रुतं तावत् कदाचित् तमवाप्नुयाम्" ।
इति साधुः स तद्रक्तधारामनुसरन् ययौ ॥९५॥

क्षताङ्गं च हृष्टं तं दृष्ट्वा जीमूतवाहनम् ।
गरुडो भक्षणं मुक्त्वा सविस्मयमचिन्तयत् ॥९६॥
"कश्चित् किमयं महात्मा भक्ष्यमाणोऽपि यो मया ।
विपद्यते न तु परं, धीरः प्रत्युत हृष्यति ?" ॥९७॥
इत्यन्तर्विमृशन्तं तं तार्क्ष्यं तादृग्विधोऽपि सः ।
निजगाद निराहारनिर्देशो जीमूतवाहनः ॥९८॥
"पक्षिराज ! ममास्त्येव शरीरे मांसशोणितम् ।
तदकस्मादतृप्तोऽपि किं निवृत्तोऽसि भक्षणात् ?" ॥९९॥
तच्छ्रुत्वाश्चर्यमापन्नः स पप्रच्छ पक्षिराट् ।
"नागः साधो ! न तावत्त्वं, ब्रूहि तत् को भवानि"ति ॥१००॥
"नाग एवास्मि, भुङ्क्ष्व त्वं यथारब्धं समापय ।
प्रारब्धा ह्यसमाप्तैव किं धीरस्योचिता क्रिया ?" ॥१०१॥
इति यावच्च जीमूतवाहनः प्रतिवक्ति तम् ।
तावत् स शङ्खचूडोऽत्र नागो दूरादधावत ॥१०२॥
"मा मा गरुत्मन्नेवैष नागो, नागो ह्यहं तव ।
तदेनं मुञ्च, कोऽयं ते जातोऽकाण्डे बत भ्रमः ?" ॥१०३॥
तच्छ्रुत्वातीव विभ्रान्तो बभूव स खगेश्वरः ।
वाञ्छितासिद्धिखिन्नश्च आसीज्जीमूतवाहनः ॥१०४॥
ततोऽन्योऽन्य-समालाप-ज्ञातविद्याधराधिपम् ।
बुद्ध्वा तं भक्षितं मोहाद् गरुत्मानन्वतप्यत ॥१०५॥
"अहो बत नृशंसस्य पापमापतितं मम ।
किं वा सुलभपापा हि भवन्त्युन्मार्गवृत्तयः ॥१०६॥

प्राच्यस्त्वेव महामेकः परार्थ-प्राणदायिना ।
ममेति-मोहैकवर्मा येन विश्वमधःकृतम् " ॥१०७॥
इति संचिन्तयन्नाथ गरुडं पापसूदनं ।
सद्भिः विस्मितं जीमूतवाहनोऽथ जगाद सः ॥१०८॥
"पक्षीन्द्र ! किं विरक्तोऽसि ? मत्तः पापाद् बिभेषि चेत् ।
तर्हीदानीं न भूयसो भक्ष्या त्वयामी भुजङ्गमाः ॥१०९॥
कार्यानुतापस्त्वेषु पूर्वभुक्तेषु भोगिषु ।
पापस्य हि प्रतीकारो ह्युपायश्चिन्तितस्तव " ॥११०॥
प्रबुद्धेन स प्राणदात्री भूतानुकम्पिना ।
"तथे"ति प्रतिपेदे तद् वाक्यं तस्य गुरोरिव ॥१११॥
ततो नागसमानीतं नाकाज्जातपतितं जवात् ।
अमृतं तत्र तत्राथाऽस्थि [illegible] ॥११२॥
तत्र माल्यादागत्य देव्या सिक्तोऽमृतेन सः ।
जीमूतवाहनो गोत्र्यां तद्भार्याभिर्विपृदया ॥११३॥
देवार्पितरसत्रोत्पुष्पमाल्याभ्युत्थानि [illegible] ।
तत्र [illegible] दुन्दुभिनर्तितः [illegible] ॥११४॥
[illegible] दृष्ट्वा [illegible] च [illegible] ।
[illegible] ॥११५॥
[illegible] तस्य भार्या च [illegible] तथा ।
[illegible] ॥११६॥
[illegible] हि [illegible] ।
[illegible] ॥११७॥

निज सर्वं तद्वृत्तान्तमविकलमदात पत्नी ।
हित्वावर्ष विनिर्गम्य वैराग्यात्मकं मम ॥११८॥
विरहप्रेम च ययौ गङ्गच्छा निजालयम् ।
गत्वा कुन्दारविन्दस्य लोकांश्चान्यानपि तद्यशः ॥११९॥



विष्णुपुराणम्

[illegible]

[illegible] —

[illegible]

'क्रियते किं वृथा वत्स ! महानेष मनोरथः ।
अन्यस्त्रीगर्भजातेन असम्भूय ममोदरे ? ॥७॥
उत्तमोत्तममप्राप्यमविवेको हि वाञ्छसि ।
सत्यं सुतस्त्वमप्यस्य किन्तु न त्वं मया धृतः ॥८॥
एतद्राजासनं सर्वभूभृत्संश्रयकेतनम् ।
योग्यं ममैव पुत्रस्य किमात्मा क्लिश्यते त्वया ? ॥९॥
उच्चैर्मनोरथस्तेऽयं मत्पुत्रस्येव किं वृथा ?
सुनीत्यामात्मनो जन्म किं त्वया नावगम्यते ?' " ॥१०॥

पराशर उवाच—

"उत्सृज्य पितरं बालस्तच्छ्रुत्वा मातृभाषितम् ।
जगाम कुपितो मातुर्निजाया द्विजमन्दिरम् ॥११॥
तं दृष्ट्वा कुपितं पुत्रमीषत्प्रस्फुरिताधरम् ।
सुनीतिरङ्कमारोप्य मैत्रेयैतदभाषत ॥१२॥
'वत्स ! कः कोपहेतुस्ते, कश्च त्वां नाभिनन्दति ?
को न जानाति पितरं तव यस्तेऽपराध्यति ?' ॥१३॥
इत्युक्तः सकलं मात्रे कथयामास तद् यथा ।
सुरुचिः प्राह भूपालप्रत्यक्षमतिगर्विता ॥१४॥
निःश्वस्य कथिते तस्मिन् इति पुत्रेण दुर्मनाः ।
श्वासक्षामेक्षणा दीना सुनीतिर्वाक्यमब्रवीत् ॥१५॥

सुनीतिरुवाच—

'सुरुचिः सत्यमाहेदं स्वल्पभाग्योऽसि पुत्रक !
न हि पुण्यवतां वत्स ! सपत्नैरेवमुच्यते ॥१६॥

नोद्विग्नस्तात ! कर्त्तव्यः कृतं यद्भवता पुरा ।
तत् कोऽप्यहर्त्तुं शक्नोति दातुं कथाहृतं त्वया ? ॥१७॥
राजासनं तथा छत्रं वराश्वा वरवारणाः ।
यस्य पुण्यानि तस्यैव भवन्त्येतानि पुत्रक ! ॥१८॥
अन्यजन्मकृतैः पुण्यैः सुरूपां सुरविस्मयः ।
भार्य्येति प्रोच्यते चान्या मद्विधा पुण्यवर्जिता ॥१९॥
पुण्योपचयसम्पन्नदाम्पत्याः पुत्रस्तयोस्समः ।
मम पुत्रस्तथा जातः स्वल्पपुण्यो ध्रुवो भवान् ॥२०॥
तथापि दुःखं न भवान् कर्त्तुमर्हति पुत्रक ।
यस्य यावत् स तेनैव स्वेन तुष्यति बुद्धिमान् ॥२१॥
यदि पितुःसमत्वार्थे सतृष्णा वत्सका तव ।
तत् पुण्योपचये यत्नं कुरु सर्वफलप्रदे ॥२२॥
सुशीलो भव धर्मात्मा मैत्रः प्राणिहिते रतः ।
निम्नं यथापः प्रवणाः पात्रमायान्ति सम्पदः' ॥२३॥

ध्रुव उवाच—

'अम्ब ! यत्त्वमिदं प्राह प्रशमाय वचो मम ।
नैतद्दुर्वचसा भिन्ने हृदये मम तिष्ठति ॥२४॥
सोऽहं तथा यतिष्यामि यथा सर्वोत्तमोत्तमम् ।
स्थानं प्राप्स्याम्यशेषाणां जगतामभिपूजितम् ॥२५॥
सुरुचिर्दयिता राज्ञस्तस्या जातोऽस्मि नोदरात् ।
प्रभावं पश्य मेऽम्ब ! त्वं वृद्धस्यापि तवोदरे ॥२६॥

उत्तमः स च मे भ्राता यो गर्भेण धृतस्तया ।
स राजासनमाप्नोतु पित्रा दत्तं तथास्तु तत् ॥२७॥
नान्यद्दत्तमभीप्सामि स्थानमम्ब स्वकर्मणा ।
इच्छामि तदहं स्थानं यन्न प्राप पिता मम' " ॥२८॥

पराशर उवाच—

"निर्जगाम गृहान्मातुरित्युक्त्वा मातरं ध्रुवः ।
पुराच्च निर्गम्य ततस्तद्बाह्योपवनं ययौ ॥२९॥
स ददर्श मुनींस्तत्र सप्त पूर्वागतान् ध्रुवः ।
कृष्णाजिनोत्तरीयेषु विष्टरेषु समास्थितान् ॥३०॥
स राजपुत्रस्तान् सर्वान् प्रणिपत्याभ्यभाषत ।
प्रश्रयावनतः सम्यगभिवादनपूर्वकम् ॥३१॥
'उत्तानपादतनयं मां निबोधत सत्तमाः ।
जातं सुनीत्या निर्वेदाद् युष्माकं प्राप्तमन्तिकम्' ॥३२॥

ऋषय ऊचुः—

'चतुःपञ्चाब्दसम्भूतो बालस्त्वं नृपनन्दन ।
निर्वेदकारणं किञ्चित्तव नाद्यापि वर्तते ॥३३॥
न चिन्त्यं भवतः किञ्चिद् ध्रियते भूपतिः पिता ।
न चैवेष्टवियोगादि तव पश्याम बालक ! ॥३४॥
शरीरे न च ते व्याधिरस्माभिरुपलक्ष्यते ।
निर्वेदः किंनिमित्तस्ते कथ्यतां यदि विद्यते' " ॥३५॥

उत्तमः स च मे भ्राता यो गर्भेणाधृतस्तया ।
स राजासनमाप्नोतु पित्रा दत्तं तथास्तु तत् ॥२७॥
नान्यदत्तमभीप्सामि स्थानमम्ब स्वकर्मणा ।
इच्छामि तदहं स्थानं यन्न प्राप पिता मम' " ॥२८॥

पराशर उवाच—

"निर्जगाम गृहान्मातुरित्युक्त्वा मातरं ध्रुवः ।
पुराच्च निर्गम्य ततस्तद्बाह्योपवनं ययौ ॥२९॥
स ददर्श मुनींस्तत्र सप्त पूर्वागतान् ध्रुवः ।
कृष्णाजिनोत्तरीयेषु विष्टरेषु समास्थितान् ॥३०॥
स राजपुत्रस्तान् सर्वान् प्रणिपत्याभ्यभाषत ।
प्रश्रयावनतः सम्यगभिवादनपूर्वकम् ॥३१॥
'उत्तानपादतनयं मां निबोधत सत्तमाः ।
जातं सुनीत्या निर्वेदाद् युष्माकं प्राप्तमन्तिकम्' ॥३२॥

ऋषय ऊचुः—

'चतुःपञ्चाब्दसम्भूतो बालस्त्वं नृपनन्दन ।
निर्वेदकारणं किञ्चित्तव नाद्यापि दृश्यते ॥३३॥
न चिन्त्यं भवतः किञ्चिद् ध्रियते भूपतिः पिता ।
न चैवेष्टवियोगादि तव पश्याम बालक ! ॥३४॥
शरीरे न च ते व्याधिरस्माभिरुपलक्ष्यते ।
निर्वेदः किंनिमित्तस्ते कथ्यतां यदि विद्यते' " ॥३५॥

पराशर उवाच—

"ततः स कथयामास सुरुच्या यदुदाहृतम् ।
तन्निशम्य ततः प्रोचुर्मुनयस्ते परस्परम् ॥३६॥
'अहो क्षात्रं परं तेजो बालस्यापि यदक्षमा ।
सपत्न्या मातुरुक्तस्य हृदयान्नापसर्पति ॥३७॥
भो भोः क्षत्रिय ! दायादनिर्वेदाद् यत्त्वयाधुना ।
कर्तुं व्यवसितं तन्नः कथ्यतां यदि रोचते ॥३८॥
यच्च कार्यं तवास्माभिः साहाय्यममितद्युते !
तदुच्यतां, विवक्षुस्त्वमस्माभिरुपलक्ष्यसे' ॥३९॥

ध्रुव उवाच—

'नाहमर्थमभीप्सामि न राज्यं द्विजसत्तमाः ।
तत् स्थानमेकमिच्छामि भुक्तं नान्येन यत् पुरा ॥४०॥
एतन्मे क्रियतां सम्यक् कथ्यतां प्राप्यते यथा ।
स्थानमग्र्यं समस्तेभ्यः स्थानेभ्यो द्विजसत्तम !' ॥४१॥

मरीचिरुवाच—

'अनाराधितगोविन्दैर्नरैः स्थानं नृपात्मज !
न हि संप्राप्यते श्रेष्ठं तस्मादाराधयाच्युतम्' ॥४२॥

अत्रिरुवाच—

'परः पराणां पुरुषो यस्य तुष्टो जनार्दनः ।
स प्राप्नोत्यक्षयं स्थानमेतत् सत्यं मयोदितम्' ॥४३॥

अङ्गिरा उवाच—

'यस्यान्तः सर्वमेवेदमच्युतस्याव्ययात्मनः ।
तमाराधय गोविन्दं स्थानमग्र्यं यदीच्छसि' ॥४४॥

पुलस्त्य उवाच—

'परं ब्रह्म परं धाम योऽसौ ब्रह्म तथा परम् ।
तमाराध्य हरिं देवं मुक्तिं प्राप्नोति दुर्लभाम्' ॥४५॥

क्रतुरुवाच—

'यो यज्ञपुरुषो यज्ञो योगेशः परमः पुमान् ।
तस्मिंस्तुष्टे तु नाप्राप्यं किञ्चिदस्ति जनार्दने' ॥४६॥

पुलह उवाच—

'ऐन्द्रमिन्द्रः परं स्थानं यमाराध्य जगत्पतिम् ।
प्राप यज्ञपतिं विष्णुं तमाराधय सुव्रत !' ॥४७॥

वसिष्ठ उवाच—

'प्राप्नोष्याराधिते विष्णौ मनसा यद्यदिच्छसि ।
त्रैलोक्यान्तर्गतं स्थानं किमु वत्सोत्तमोत्तमम्' ॥४८॥

ध्रुव उवाच—

'आराध्यः कथितो देवो भवद्भिः प्रणतस्य मे ।
मया तत्परितोषाय यज्जप्तव्यं तदुच्यताम् ॥४९॥
यथा चाराधने तस्य मया कार्यं महात्मनः ।
प्रसादसुमुखास्तन्मे कथयन्तु महर्षयः'

पराशर उवाच—

"ततः स कथयामास सुरुच्या यदुदाहृतम् ।
तद्विमृश्य ततः प्रोचुर्मुनयस्ते परस्परम् ॥२६॥
'अहो क्षात्रं परं तेजो बालस्यापि यदक्षमा ।
सपत्न्या मातुरुक्तस्य हृदयान्नापसर्पति ॥२७॥
भो भोः क्षत्रिय! दायादनिर्वेदाद् यत्त्वयाधुना ।
कर्त्तुं व्यवसितं तन्नः कथ्यतां यदि रोचते ॥२८॥
यच्च कार्यं तवास्माभिः साहाय्यममितद्युते!
तदुच्यतां, विवक्षुस्त्वमस्माभिरुपलक्ष्यसे' ॥२९॥

ध्रुव उवाच—

'नाहमर्थमभीप्सामि न राज्यं द्विजसत्तमाः!
तत् स्थानमेकमिच्छामि भुक्तं नान्येन यत् पुरा ॥३०॥
एतन्मे क्रियतां सम्यक् कथ्यतां प्राप्यते यथा ।
स्थानमग्र्यं समस्तेभ्यः स्थानेभ्यो द्विजसत्तम!' ॥३१॥

मरीचिरुवाच—

'अनाराधितगोविन्दैर्नरैः स्थानं नृपात्मज!
न हि संप्राप्यते श्रेष्ठं तस्मादाराधयाच्युतम्' ॥३२॥

अत्रिरुवाच—

'परः पराणां पुरुषो यस्य तुष्टो जनार्दनः ।
स प्राप्नोत्यक्षयं स्थानमेतत् सत्यं मयोदितम्' ॥३३॥

अङ्गिरा उवाच—

'यस्यान्तः सर्वमेवेदमच्युतस्याव्ययात्मनः ।
तमाराधय गोविन्दं स्थानमग्र्यं यदीच्छसि' ॥४४॥

पुलस्त्य उवाच—

'परं ब्रह्म परं धाम योऽसौ ब्रह्म तथा परम् ।
तमाराध्य हरिं देवं मुक्तिं प्राप्नोति दुर्लभाम्' ॥४५॥

क्रतुरुवाच—

'यो यज्ञपुरुषो यज्ञो योगेशो यः परमः पुमान् ।
तस्मिंस्तुष्टे तु नाप्राप्यं किञ्चिदस्ति जनार्दने' ॥४६॥

पुलह उवाच—

'ऐन्द्रमिन्द्रः परं स्थानं यमाराध्य जगत्पतिम् ।
प्राप यज्ञपतिं विष्णुं तमाराधय सुव्रत !' ॥४७॥

वसिष्ठ उवाच—

'प्राप्नोष्याराधिते विष्णौ मनसा यद्यदिच्छसि ।
त्रैलोक्यान्तर्गतं स्थानं किमु वत्सोत्तमोत्तमम्' ॥४८॥

ध्रुव उवाच—

'आराध्यः कथितो देवो भवद्भिः प्रणतस्य मे ।
मया तत्परितोषाय यज्जप्यं तदुच्यताम् ॥४९॥
यथा चाराधनं तस्य मया कार्यं महात्मनः ।
प्रसादसुमुखास्तन्मे कथयन्तु महर्षयः' ॥५०॥

[illegible]—

'[illegible]' [illegible] ।
[illegible] ॥११॥
[illegible] ।
[illegible] ॥१२॥
[illegible] ।
[illegible] ॥१३॥
[illegible] ।
[illegible] ॥१४॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥१५॥